चं चक्राय नमः । चक्र श्रीपादुकां पूजयामि तर्पयामि नमः ।

ओं एताः नवमावरण देवताः साङ्गाः सायुधाः सशक्तिकाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः ।

ओं ह्रीं ह्सौः ह्लीं श्रीं नमो लक्ष्मीनारायणाय । श्री लक्ष्मीनारायण श्रीपादुकां पूजयामि तर्पयामि नमः । (३ वारं)

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् ॥

अनेन नवमावरणार्चनेन भगवान् सर्वदेवात्मक श्री लक्ष्मीनारायण प्रीयताम् । (योनि मुद्रया प्रणमेत् ।)

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचार पूजान् कल्पयामि ।

पूर्ण आनन्द लहरि



॥ श्रीलक्ष्मीनारायण श्री पादुकां पूजयामि नमः ॥

# श्रीलक्ष्मीनारायण वज्रपञ्जरकवच स्तोत्रम्

श्रीभैरव उवाच –

अधुना देवि वक्ष्यामि लक्ष्मीनारायणस्य ते ।
कवचं मन्त्रगर्भं च वज्रपञ्जरकाख्यया ॥ 1 ॥

श्रीवज्रपञ्जरं नाम कवचं परमाद्भुतम् ।
रहस्यं सर्वदेवानां साधकानां विशेषतः ॥ 2 ॥

यं धृत्वा भगवान् देवः प्रसीदति परः पुमान् ।
यस्य धारणमात्रेण ब्रह्मा लोकपितामहः ॥ 3 ॥

ईश्वरोऽहं शिवो भीमो वासवोऽपि दिवस्पतिः ।
सूर्यस्तेजोनिधिर्देवि चन्द्रमास्तारकेश्वरः ॥ 4 ॥

वायुश्च बलवांल्लोके वरुणो यादसाम्पतिः ।
कुबेरोऽपि धनाध्यक्षो धर्मराजो यमः स्मृतः ॥ 5 ॥

यं धृत्वा सहसा विष्णुः संहरिष्यति दानवान् ।
जघान रावणादींश्च किं वक्ष्येऽहमतः परम् ॥ 6 ॥

कवचस्यास्य सुभगे कथितोऽयं मुनिः शिवः ।
त्रिष्टुप् छन्दो देवता च लक्ष्मीनारायणो मतः ॥ 7 ॥

रमा बीजं परा शक्तिस्तारं कीलकमीश्वरि ।
भोगापवर्गसिद्ध्यर्थं विनियोग इति स्मृतः ॥ 8 ॥

ॐ अस्य श्रीलक्ष्मीनारायणकवचस्तोत्रमहामन्त्रस्य सदाशिव ऋषिः शिरसि ।
त्रिष्टुप् छन्दः मुखे । श्रीलक्ष्मीनारायणो देवता हृदये ।

श्रीं बीजं । ह्रीं शक्तिः । ॐ कीलकं ।
भोगापवर्गसिद्ध्यर्थे कवचस्तोत्रजपे विनियोगः ॥

## करन्यासः -

ह्रां श्रां अङ्गुष्ठाभ्यां नमः ।
ह्रीं श्रीं तर्जनीभ्यां नमः ।
ह्रूं श्रूं मध्यमाभ्यां नमः ।
ह्रैं श्रैं अनामिकाभ्यां नमः ।
ह्रौं श्रौं कनिष्ठिकाभ्यां नमः ।
ह्रः श्रः करतलकरपृष्ठाभ्यां नमः ।

## अङ्गन्यासः -

ह्रां श्रां हृदयाय नमः ।
ह्रीं श्रीं शिरसे स्वाहा ।
ह्रूं श्रूं शिखायै वषट् ।

ह्रैं श्रैं कवचाय हुं ।
ह्रौं श्रौं नेत्रत्रयाय वौषट् ।
ह्रः श्रः अस्त्राय फट् ।

ओं भूर्भुवस्वरों इति दिग्बन्धः ॥

## ध्यानम् -

पूर्णेन्दुवदनं पीतवाससं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥ 9 ॥

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

ॐ वासुदेवोऽवतु मे मस्तकं सशिरोरुहम् ।
ह्रीं ललाटं सदा पातु लक्ष्मीविष्णुः समन्ततः ॥ 10 ॥

ह्सौः नेत्रेऽवताल्लक्ष्मीगोविन्दो जगतां पतिः ।

ह्रीं नासां सर्वदा पातु लक्ष्मीदामोदरः प्रभुः ॥ 11 ॥

श्रीं मुखं सततं पातु देवो लक्ष्मीत्रिविक्रमः ।
लक्ष्मी कण्ठं सदा पातु देवो लक्ष्मीजनार्दनः ॥ 12 ॥

नारायणाय बाहू मे पातु लक्ष्मीगदाग्रजः ।
नमः पार्श्वौ सदा पातु लक्ष्मीनन्दैकनन्दनः ॥ 13 ॥

अं आं इं ईं पातु वक्षो ॐ लक्ष्मीत्रिपुरेश्वरः ।
उं ऊं ऋं ॠं पातु कुक्षिं ह्रीं लक्ष्मीगरुडध्वजः ॥ 14 ॥

ऌं ॡं एं ऐं पातु पृष्ठं ह्सौः लक्ष्मीनृसिंहकः ।
ओं औं अं अः पातु नाभिं ह्रीं लक्ष्मीविष्टरश्रवः ॥ 15 ॥

कं खं गं घं गुदं पातु श्रीं लक्ष्मीकैटभान्तकः ।
चं छं जं झं पातु शिश्नं लक्ष्मी लक्ष्मीश्वरः प्रभुः ॥ 16 ॥

टं ठं डं ढं कटिं पातु नारायणाय नायकः ।
तं थं दं धं पातु चोरू नमो लक्ष्मीजगत्पतिः ॥ 17 ॥

पं फं बं भं पातु जानू ॐ ह्रीं लक्ष्मीचतुर्भुजः ।
यं रं लं वं पातु जङ्घे ह्सौः लक्ष्मीगदाधरः ॥ 18 ॥

शं षं सं हं पातु गुल्फौ ह्रीं श्रीं लक्ष्मीरथाङ्गभृत् ।

ळं क्षः पादौ सदा पातु मूलं लक्ष्मीसहस्रपात् ॥ 19 ॥

ङं ञं णं नं मं मे पातु लक्ष्मीशः सकलं वपुः ।
इन्द्रो मां पूर्वतः पातु वह्निर्वह्नौ सदावतु ॥ 20 ॥

यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च माम् ।
वरुणः पश्चिमेऽव्यान्मां वायव्येऽवतु मां मरुत् ॥ 21 ॥

उत्तरे धनदः पायादैशान्यामीश्वरोऽवतु ।
वज्रशक्तिदण्डखड्ग पाशयष्टिध्वजाङ्किताः ॥ 22 ॥

सशूलाः सर्वदा पान्तु दिगीशाः परमार्थदाः ।
अनन्तः पात्वधो नित्यमूर्ध्वे ब्रह्मावताच्च माम् ॥ 23 ॥

दशदिक्षु सदा पातु लक्ष्मीनारायणः प्रभुः ।
प्रभाते पातु मां विष्णुर्मध्याह्ने वासुदेवकः ॥ 24 ॥

दामोदरोऽवतात् सायं निशादौ नरसिंहकः ।
सङ्कर्षणोऽर्धरात्रेऽव्यात् प्रभातेऽव्यात् त्रिविक्रमः ॥ 25 ॥

अनिरुद्धः सर्वकालं विश्वक्सेनश्च सर्वतः ।
रणे राजकुले द्युते विवादे शत्रुसङ्कटे ।
ॐ ह्रीं ह्सौः ह्रीं श्रीं मूलं लक्ष्मीनारायणोऽवतु ॥ 26 ॥

ॐॐॐरणराजचौररिपुतः पायाच्च मां केशवः
ह्लींह्लींह्लींहहहाह्सौः हसह्सौः वह्लेर्वतान्माधवः ।
ह्लींह्लींह्लींजलपर्वताग्रभयतः पायादनन्तो विभुः
श्रींश्रींश्रींशशाललं प्रतिदिनं लक्ष्मीधवः पातु माम् ॥ 27 ॥

## अङ्गन्यासः -

ह्रां श्रां हृदयाय नमः ।
ह्रीं श्रीं शिरसे स्वाहा ।
ह्रूं श्रूं शिखायै वषट् ।
ह्रैं श्रैं कवचाय हुं ।
ह्रौं श्रौं नेत्रत्रयाय वौषट् ।
ह्रः श्रः अस्त्राय फट् ।

ओं भूर्भुवस्वरों इति दिग्विमोकः ॥

## ध्यानम् -

पूर्णेन्दुवदनं पीतवाससं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।

हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

इतीदं कवचं दिव्यं वज्रपञ्जरकाभिधम् ।
लक्ष्मीनारायणस्येष्टं चतुर्वर्गफलप्रदम् ॥ 28 ॥

सर्वसौभाग्यनिलयं सर्वसारस्वतप्रदम् ।
लक्ष्मीसंवननं तत्वं परमार्थरसायनम् ॥ 29 ॥

मन्त्रगर्भं जगत्सारं रहस्यं त्रिदिवौकसाम् ।
दशवारं पठेद्रात्रौ रतान्ते वैष्णवोत्तमः ॥ 30 ॥

स्वप्ने वरप्रदं पश्येल्लक्ष्मीनारायणं सुधीः ।
त्रिसन्ध्यं यः पठेन्नित्यं कवचं मन्मुखोदितम् ॥ 31 ॥

स याति परमं धाम वैष्णवं वैष्णवोत्तमः ।
महाचीनपदस्थोऽपि यः पठेदात्मचिन्तकः ॥ 32 ॥

आनन्दपरितस्तूर्णं लभेद् मोक्षं स साधकः ।
गन्धाष्टकेन विलिखेद्रवौ भूर्जे जपन्मनुम् ॥ 33 ॥

पीतसूत्रेण संवेष्ट्य सौवर्णेनाथ वेष्टयेत् ।
धारयेद्गुटिकां मूर्ध्नि लक्ष्मीनारायणं स्मरन् ॥ 34 ॥

रणे रिपुन् विजित्याशु कल्याणी गृहमाविशेत् ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥ 35 ॥

सा बध्नीयान् कण्ठदेशे लभेत् पुत्रांश्चिरायुषः ।
गुरूपदेशतो धृत्वा गुरुं ध्यात्वा मनुं जपन् ॥ 36 ॥

वर्णलक्षपुरश्चर्या फलमाप्नोति साधकः ।
बहुनोक्तेन किं देवि कवचस्यास्य पार्वति ॥ 37 ॥

विनानेन न सिद्धिः स्यान्मन्त्रस्यास्य महेश्वरि ।
सर्वागमरहस्याढ्यं तत्त्वात् तत्त्वं परात् परम् ॥ 38 ॥

अभक्ताय न दातव्यं कुचैलाय दुरात्मने ।
दीक्षिताय कुलीनाय स्वशिष्याय महात्मने ॥ 39 ॥

महाचीनपदस्थाय दातव्यं कवचोत्तमम् ।
गुह्यं गोप्यं महादेवि लक्ष्मीनारायणप्रियम् ।
वज्रपञ्जरकं वर्म गोपनीयं स्वयोनिवत् ॥ 40 ॥

॥ इति श्रीरुद्रयामले तन्त्रे श्रीलक्ष्मीनारायणवज्रपञ्जरकवचं सम्पूर्णम् ॥



॥ श्रीलक्ष्मीनारायण श्री पादुकां पूजयामि नमः ॥

# श्री लक्ष्मीनारायण हृदय स्तोत्रम्

अस्य श्रीलक्ष्मीनारायणहृदयस्तोत्रमन्त्रस्य भार्गव ऋषिः (शिरसि) ।
अनुष्टुप् छन्दः (मुखे) । श्रीलक्ष्मीनारायणो देवता (हृदये) ।

ओं बीजं (गुह्ये) । नमः शक्तिः (पादयोः) । नारायणायेति कीलकं (नाभौ) ।
श्रीमन्नारायण प्रसाद सिद्ध्यर्थे जपे विनियोगः (सर्वाङ्गे) ॥

**करन्यासः –**

नारायणः परं ज्योतिरात्मा नारायणः परः **अङ्गुष्ठाभ्यां नमः** ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते **तर्जनीभ्यां नमः** ।
नारायणः परो देवो धाता नारायणः परः **मध्यमाभ्यां नमः** ।
नारायणः परं धाम ध्यानं नारायणः परः **अनामिकाभ्यां नमः** ।
नारायण परो धर्मो नारायण नमोऽस्तु ते **कनिष्ठिकाभ्यां नमः** ।
विश्वं नारायणः साक्षान्नारायण नमोऽस्तु ते **करतलकरपृष्ठाभ्यां नमः** ।

**अङ्गन्यासः –**

नारायणः परं ज्योतिरात्मा नारायणः परः **हृदयाय नमः** ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते **शिरसे स्वाहा** ।
नारायणः परो देवो धाता नारायणः परः **शिखायै वौषट्** ।
नारायणः परं धाम ध्यानं नारायणः परः **कवचाय हुम्** ।

नारायण परो धर्मो नारायण नमोऽस्तु ते **नेत्रत्रयाय वौषट्** ।
विश्वं नारायणः साक्षान्नारायण नमोऽस्तु ते **अस्त्राय फट्** ।

ओं भूर्भुवस्वरों इति दिग्बन्धः ।

## ध्यानम् –

उद्यदादित्यसङ्काशं पीतवासं चतुर्भुजम् ।
शङ्ख-चक्र-गदा-पाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ॥

त्रैलोक्याधारचक्रं तदुपरि कमठं तत्र चानन्तभोगी
तन्मध्ये भूमिपद्माङ्कुशशिखरदलं कर्णिकाभूत-मेरुम् ।
तत्रस्थं शान्तमूर्तिं मणिमयमकुटं कुण्डलोद्भासिताङ्गं
लक्ष्मीनारायणाख्यं सरसिजनयनं सन्ततं चिन्तयामः ॥

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

अस्य श्रीनारायणहृदयस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः (शिरसि) ।
अनुष्टुप् छन्दः (मुखे) । श्रीमन्नारायणो देवता (हृदये) ।

ओं बीजं (गुह्ये) । नमः शक्तिः (पादयोः) । नारायणायेति कीलकं (नाभौ) ।
श्रीमन्नारायण प्रसाद सिद्ध्यर्थे हृदयजपे विनियोगः (सर्वाङ्गे) ॥

ॐ नारायणः परं ज्योतिरात्मा नारायणः परः ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते ॥ 1 ॥

नारायणः परो देवो धाता नारायणः परः ।
नारायणः परो ध्याता नारायण नमोऽस्तु ते ॥ 2 ॥

नारायणः परं धाम ध्यानं नारायणः परः ।
नारायण परो धर्मो नारायण नमोऽस्तु ते ॥ 3 ॥

नारायणः परो देवो विद्या नारायणः परः ।
विश्वं नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 4 ॥

नारायणाद् विधिर्जातो जातो नारायणाद् भवः ।
जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते ॥ 5 ॥

रविर्नारायणस्तेजः चन्द्रो नारायणो महः ।
वह्निर्नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 6 ॥

नारायण उपास्यः स्याद् गुरुर्नारायणः परः ।
नारायणः परो बोधो नारायण नमोऽस्तु ते ॥ 7 ॥

नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम् ।
हरिर्नारायणः शुद्धो नारायण नमोऽस्तु ते ॥ 8 ॥

निगमावेदितानन्तकल्याणगुणवारिधे ।
नारायण नमस्तेऽस्तु नरकार्णवतारक ॥ 9 ॥

जन्ममृत्युजराव्याधिपारतन्त्र्यादिभिः सदा ।
दोषैरस्पृष्टरूपाय नारायण नमोऽस्तु ते ॥ 10 ॥

वेदशास्त्रार्थविज्ञान साध्यभक्त्येकगोचर ।
नारायण नमस्तेऽस्तु मामुद्धर भवार्णवात् ॥ 11 ॥

नित्यानन्द महोदार परात्पर जगत्पते ।
नारायण नमस्तेऽस्तु मोक्षसाम्राज्यदायिने ॥ 12 ॥

आब्रह्म-स्थम्बपर्यन्तं अखिलात्ममहाश्रय ।
सर्वभूतात्म भूतात्मन् नारायण नमोऽस्तु ते ॥ 13 ॥

पालिताशेष-लोकाय पुण्यश्रवण कीर्तन ।
नारायण नमस्तेऽस्तु प्रलयोदक शायिने ॥ 14 ॥

निरस्त सर्वदोषाय भक्त्यादि गुणदायिने ।
नारायण नमस्तेऽस्तु त्वां विना न हि मे गतिः ॥ 15 ॥

धर्मार्थ-काम-मोक्षाख्य पुरुषार्थ प्रदायिने ।
नारायण नमस्तेऽस्तु पुनस्तेऽस्तु नमो नमः ॥ 16 ॥

## प्रार्थना –

नारायण त्वमेवासि दहराख्ये हृदि स्थितः ।
प्रेरिता प्रेर्यमाणानां त्वया प्रेरित मानसः ॥ 17 ॥

त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ।
नानोपासन मार्गाणां भवकृद् भावबोधकः ॥ 18 ॥

भावार्थकृद् भवातीतो भव सौख्यप्रदो मम ।
त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितम् ॥ 19 ॥

त्वदधिष्ठान मात्रेण सा वै सर्वार्थकारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान् समर्थय ॥ 20 ॥

न मे त्वदन्यस्त्रातास्ति त्वदन्यन्न हि दैवतम् ।
त्वदन्यं न हि जानामि पालकं पुण्यवर्धनम् ॥ 21 ॥

यावत्सांसारिको भावो मनस्स्थो भावनात्मकः ।
तावत्सिद्धिर्भवेत् साध्या सर्वदा सर्वदा विभो ॥ 22 ॥

पापिनामहमेकाग्रो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ 23 ॥

त्वयाहं नैव सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो वा न सृष्टश्चेत् औषधस्य वृथोदयः ॥ 24 ॥

पापसङ्ग परिश्रान्तः पापात्मा पापरूपधृक् ।
त्वदन्यः कोऽत्र पापेभ्यः त्रातास्ति जगतीतले ॥ 25 ॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव सेव्यश्च गुरुस्त्वमेव त्वमेव सर्वं मम देव देव ॥ 26 ॥

अस्य श्री आद्यादिमहालक्ष्मीहृदयस्तोत्र महामन्त्रस्य भार्गव ऋषिः (शिरसि) । अनुष्टुबादी-नानाछन्दांसि (मुखे) । आद्यादि श्रीमहालक्ष्मी सहित श्रीमन्नारायणो देवता (हृदये) ॥

श्रीं बीजं (गुह्ये) । ह्रीं शक्तिः (पादयोः) । ऐं कीलकं (नाभौ) ।
आद्यादिश्रीमहालक्ष्मी प्रसादसिद्ध्यर्थं जपे विनियोगः (सर्वाङ्गे) ॥

**करन्यासः –**

ओं श्रीं अङ्गुष्ठाभ्यां नमः ।
ओं ह्रीं तर्जनीभ्यां नमः ।
ओं ऐं मध्यमाभ्यां नमः ।
ओं श्रीं अनामिकाभ्यां नमः ।
ओं ह्रीं कनिष्ठिकाभ्यां नमः ।
ओं ऐं करतलकरपृष्ठाभ्यां नमः ।
ओं श्रीं ह्रीं ऐं करतलकरपार्श्वयोः ।

**अङ्गन्यासः –**

ओं श्रीं हृदयाय नमः ।
ओं ह्रीं शिरसे स्वाहा ।
ओं ऐं शिखायै वषट् ।
ओं श्रीं कवचाय हुम् ।
ओं ह्रीं नेत्रत्रयाय वौषट् ।
ओं ऐं अस्त्राय फट् ।

ओं भूर्भुवस्वरों इति दिग्बन्धः ।

**ध्यानम् –**

हस्तद्वयेन कमले धारयन्तीं स्वलीलया ।
हारनूपुरसम्युक्तां लक्ष्मीं देवीं विचिन्तये ॥

कौशेय-पीतवसना-मरविन्दनेत्रां
पद्मद्वयाभय-वरोद्यत-पद्महस्ताम् ।
उद्यच्छशाङ्क-सदृशीं परमाङ्क-संस्थां
ध्यायेद्विधीशनत-पादयुगां जनित्रीम् ॥

ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा ॥ (108 वारं जपित्वा)

पीतवस्त्रां सुवर्णाङ्गीं पद्महस्तद्वायान्विताम् ।
लक्ष्मीं ध्यात्वेति मन्त्रेण स भवेत्पृथिवीपतिः ॥

मातुलुङ्गं गदां खेटं पाणौ पात्रं च बिभ्रती ।
नागं लिङ्गं च योनिं च बिभ्रतीं चैव मूर्धनि ॥

**पञ्चपूजा –**

लं पृथिव्यात्मिकायै गन्धं कल्पयामि ।
हं आकाशात्मिकायै पुष्पाणि कल्पयामि ।
यं वाय्वात्मिकायै धूपं कल्पयामि ।
रं अग्न्यात्मिकायै दीपं कल्पयामि ।
वं अमृतात्मिकायै अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मिकायै ताम्बूलादि समस्तोपचारान् कल्पयामि ।

॥ ॐ श्रीं ह्रीं ऐं ॥

वन्दे लक्ष्मीं परमशिवमयीं शुद्धजाम्बूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलाङ्गीम् ।
बीजापूरं कनककलशं हेमपद्मं दधानां
आद्यां शक्तिं सकलजननीं सर्वमाङ्गल्ययुक्ताम् ॥ 1 ॥

श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ।
सर्वकाम-फलावाप्ति-साधनैक-सुखावहाम् ॥ 2 ॥

स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः ।
त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ॥ 3 ॥

समस्तसम्पत्सुखदां महाश्रियं
समस्तकल्याणकरीं महाश्रियम् ।
समस्तसौभाग्यकरीं महाश्रियं
भजाम्यहं ज्ञानकरीं महाश्रियम् ॥ 4 ॥

विज्ञानसम्पत्सुखदां महाश्रियम्
विचित्रवाग्भूतिकरीं मनोरमाम् ।
अनन्तसौभाग्यसुखप्रदायिनीं
नमाम्यहं भूतिकरीं हरिप्रियाम् ॥ 5 ॥

समस्तभूतान्तरसंस्थिता त्वं
समस्तभक्तेश्वरि विश्वरूपे ।
तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु
त्वत्पादपद्मं प्रणमाम्यहं श्रीः ॥ 6 ॥

दारिद्र्य दुःखौघ तमोपहन्त्री
त्वत्पादपद्मं मयि सन्निधत्स्व ।
दीनार्तिविच्छेदन हेतुभूतैः
कृपाकटाक्षैरभिषिञ्च मां श्रीः ॥ 7 ॥

विष्णुस्तुति परां लक्ष्मीं स्वर्णवर्णस्तुतिप्रियाम् ।
वरदाभयदां देवीं वन्दे त्वां कमलेक्षणे ॥ 8 ॥

अम्ब प्रसीद करुणापरिपूर्णदृष्ट्या
मां त्वत्कृपाद्रविणगेहमिमं कुरुष्व ।
आलोकय प्रणतहृद्गतशोकहन्त्री
त्वत्पादपद्मयुगळं प्रणमाम्यहं श्रीः ॥ 9 ॥

शान्त्यै नमोऽस्तु शरणागतरक्षणायै
कान्त्यै नमोऽस्तु कमनीयगुणाश्रयायै ।
क्षान्त्यै नमोऽस्तु दुरितक्षयकारणायै
दात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै ॥ 10 ॥

शक्त्यै नमोऽस्तु शशिशेखरसंस्थितायै
रत्यै नमोऽस्तु रजनीकरसोदरायै ।
भक्त्यै नमोऽस्तु भवसागरतारकायै
मत्यै नमोऽस्तु मधुसूदनवल्लभायै ॥ 11 ॥

लक्ष्म्यै नमोऽस्तु शुभलक्षणलक्षितायै
सिद्ध्यै नमोऽस्तु सुरसिद्धसुपूजितायै ।
धृत्यै नमोऽस्तु मम दुर्गतिभञ्जनायै
गत्यै नमोऽस्तु वरसद्गतिदायिकायै ॥ 12 ॥

देव्यै नमोऽस्तु दिवि देवगणार्चितायै
भूत्यै नमोऽस्तु भुवनार्तिविनाशकायै ।
शान्त्यै नमोऽस्तु धरणीधरवल्लभायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ 13 ॥

सुतीव्र-दारिद्य-तमोपहन्त्र्यै
नमोऽस्तु ते सर्वभयापहन्त्र्यै ।
श्रीविष्णुवक्षःस्थल संस्थितायै
नमो नमः सर्वविभूतिदायै ॥ 14 ॥

जयतु जयतु लक्ष्मीर्लक्षणालङ्कृताङ्गी
जयतु जयतु पद्मा पद्मसद्माभिवन्द्या ।
जयतु जयतु विद्या विष्णुवामाङ्कसंस्था
जयतु जयतु सम्यक्सर्वसम्पत्करा श्रीः ॥ 15 ॥

जयतु जयतु देवी देवसङ्घाभिपूज्या
जयतु जयतु भद्रा भार्गवी भाग्यरूपा ।
जयतु जयतु नित्या निर्मलज्ञानवेद्या
जयतु जयतु सत्या सर्वभूतान्तरस्था ॥ 16 ॥

जयतु जयतु रम्या रत्नगर्भान्तरस्था
जयतु जयतु शुद्धा शुद्धजाम्बूनदाभा ।
जयतु जयतु कान्ता कान्तिमद्भासिताङ्गी
जयतु जयतु शान्ता शीघ्रमागच्छ सौम्ये ॥ 17 ॥

यस्याः कलायाः कमलोद्भवाद्या रुद्राश्च शक्र प्रमुखाश्च देवाः ।
जीवन्ति सर्वेऽपि सशक्तयस्ते प्रभुत्वमाप्ताः परमायुषस्ते ॥ 18 ॥

**॥ मुखबीजं – ॐ ह्रां ह्रीं अं आं यं दुं लं वं ॥**

विलेख निटिले विधिर्मम लिपिं विसृज्यान्तरं
त्वया विलिखितव्यमेतदिति तत्फलप्राप्तये ।
तदन्तिकफलेस्फुटं कमलवासिनी श्रीरिमां
समर्पय स्वमुद्रिकां सकलभाग्य संसूचिकाम् ॥ 19 ॥

**॥ पादबीजं – ॐ अं आं इं एं ऐं कं लं रं ॥**

कलया ते यथा देवि जीवन्ति सचराचराः ।
तथा सम्पत्करि लक्ष्मि सर्वदा सम्प्रसीद मे ॥ 20 ॥

यथा विष्णुर्ध्रुवं नित्यं स्वकलां संन्यवेशयत् ।
तथैव स्वकलां लक्ष्मि मयि सम्यक् समर्पय ॥ 21 ॥

सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे ।
अचलां कुरु यत्नेन कलां मयि निवेशिताम् ॥ 22 ॥

मुदास्तां मत्फाले परमपदलक्ष्मीः स्फुटकला
सदा वैकुण्ठश्रीर्निवसतु कला मे नयनयोः ।
वसेत्सत्ये लोके मम वचसि लक्ष्मीर्वरकला
श्रियः श्वेतद्वीपे निवसतु कलामेऽस्तुकरयोः ॥ 23 ॥

**॥ नेत्रबीजं – ॐ घ्रां घ्रीं घ्रें घ्रैं घ्रों घ्रौं घ्रं घ्रः ॥**

तावन्नित्यं ममाङ्गेषु क्षीराब्धौ श्रीकला वसेत् ।
सूर्याचन्द्रमसौ यावत् तावल्लक्ष्मीपतिः श्रियौ ॥ 24 ॥

सर्वमङ्गलसम्पूर्णा सर्वैश्वर्यसमन्विता ।
आद्यादि श्रीर्महालक्ष्मी त्वत्कला मयि तिष्ठतु ॥ 25 ॥

अज्ञानतिमिरं हन्तुं शुद्धज्ञानप्रकाशिका ।
सर्वैश्वर्यप्रदा मेऽस्तु त्वत्कला मयि संस्थिता ॥ 26 ॥

अलक्ष्मीं हरतु क्षिप्रं तमः सूर्यप्रभा यथा ।
वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता ॥ 27 ॥

ऐश्वर्यमङ्गलोत्पत्तिः त्वत्कलायां निधीयते ।
मयि तस्मात् कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥ 28 ॥

भवदावेशभाग्यार्हो भाग्यवानस्मि भार्गवि ।
त्वत्प्रसादात् पवित्रोऽहं लोकमातः नमोऽस्तु ते ॥ 29 ॥

पुनासि मां त्वत्कलयैव यस्मादतः समागच्छ ममाग्रतस्त्वम् ।
परं पदं श्रीर्भव सुप्रसन्ना मय्यच्युतेन प्रविशादिलक्ष्मीः ॥ 30 ॥

श्रीवैकुण्ठ स्थिते लक्ष्मि समागच्छ ममाग्रतः ।
नारायणेन सह मां कृपादृष्ट्याऽवलोकय ॥ 31 ॥

सत्यलोक स्थिते लक्ष्मि त्वं ममागच्छ सन्निधिम् ।
वासुदेवेन सहिता प्रसीद वरदा भव ॥ 32 ॥

श्वेतद्वीप स्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते ।
विष्णुना सहिते देवि जगन्मातः प्रसीद मे ॥ 33 ॥

क्षीराम्बुधि स्थिते लक्ष्मि समागच्छ समाधवे ।
त्वत्कृपादृष्टिसुधया सततं मां विलोकय ॥ 34 ॥

रत्नगर्भ स्थिते लक्ष्मि परिपूर्णे हिरण्मये ।
समागच्छ समागच्छ स्थित्वाशु पुरतो मम ॥ 35 ॥

स्थिरा भव महालक्ष्मि निश्चला भव निर्मले ।
प्रसन्ने कमले देवि प्रसन्न हृदया भव ॥ 36 ॥

श्रीधरे श्रीमहाभूते त्वदन्तःस्थं महानिधिम् ।
शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय ॥ 37 ॥

वसुन्धरे श्रीवसुधे वसुदोग्ध्रि कृपामयि ।
त्वत्कुक्षिगत सर्वस्वं शीघ्रं मे सम्प्रदर्शय ॥ 38 ॥

विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे ।
त्वत् गर्भगत-हेमादीन् सम्प्रदर्शय दर्शय ॥ 39 ॥

रसातलगते लक्ष्मि शीघ्रमागच्छ मे पुरः ।
न जाने परमं रूपं मातर्मे सम्प्रदर्शय ॥ 40 ॥

आविर्भव मनोवेगात् शीघ्रमागच्छ मे पुरः ।
मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ॥ 41 ॥

देवि शीघ्रं ममागच्छ धरणीगर्भ-संस्थिते ।
मातस्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात् ॥ 42 ॥

उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि ।
अक्षय्यान् हेमकलशान् सुवर्णेन सुपूरितान् ॥ 43 ॥

निक्षेपान्मे समाकृष्य समुद्धृत्य ममाग्रतः ।
समुन्नतानना भूत्वा सम्यग्देहि धरातलात् ॥ 44 ॥

मत्सन्निधिं समागच्छ मदाहित-कृपारसात् ।
प्रसीद श्रेयसां दोग्ध्री लक्ष्मीर्मे नयनाग्रतः ॥ 45 ॥

अत्रोपविश्य लक्ष्मि त्वं स्थिरा भव हिरण्मये ।
सुस्थिरा भव सम्प्रीत्या प्रसीद वरदा भव ॥ 46 ॥

आनीतांस्तु त्वया देवि निधीन्मे सम्प्रदर्शय ।
अद्य क्षणेन सहसा दत्त्वा संरक्ष मां सदा ॥ 47 ॥

मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि ।
अभयं कुरु मे देवि महालक्ष्मिः नमोऽस्तु ते ॥ 48 ॥

समागच्छ महालक्ष्मि शुद्धजाम्बूनदप्रभे ।
प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥ 49 ॥

लक्ष्मीर्भुवं गता भासि यत्र यत्र हिरण्मयी ।
तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ॥ 50 ॥

क्रीडन्ती बहुधा भूमौ परिपूर्णकृपामयि ।
मम मूर्धनि ते हस्तमविलम्बितमर्पय ॥ 51 ॥

फलभाग्योदये लक्ष्मि समस्तपुरवासिनी ।
प्रसीद मे महालक्ष्मि परिपूर्णमनोरथे ॥ 52 ॥

अयोध्यादिषु सर्वेषु नगरेषु समास्थिते ।
वैभवैर्विविधैर्युक्तैः समागच्छ मुदान्विते ॥ 53 ॥

समागच्छ समागच्छ ममाग्रे भव सुस्थिरा ।
करुणारस-निष्यन्द-नेत्रद्वय विलासिनी ॥ 54 ॥

सन्निधत्स्व महालक्ष्मि त्वत्पाणिं मम मस्तके ।
करुणासुधया मां त्वमभिषिञ्च स्थिरं कुरु ॥ 55 ॥

सर्वराजगृहे लक्ष्मि समागच्छ बलान्विते ।
स्थित्वाऽऽशु पुरतो मेऽद्य प्रसादेनाऽभयं कुरु ॥ 56 ॥

सादरं मस्तके हस्तं मम त्वं कृपयाऽर्पय ।
सर्वराजस्थिते लक्ष्मि त्वत्कला मयि तिष्ठतु ॥ 57 ॥

आद्यादि श्रीमहालक्ष्मि विष्णुवामाङ्कसंस्थिते ।
प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥ 58 ॥

प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे ।
अचला भव सुप्रीता सुस्थिरा भव मद्गृहे ॥ 59 ॥

यावत्तिष्ठन्ति वेदाश्च यावच्चन्द्रदिवाकरौ ।
यावद्विष्णुश्च यावत्त्वं तावत्कुरु कृपां मयि ॥ 60 ॥

चान्द्री कला यथा शुक्ले वर्धते सा दिने दिने ।
तथा दया ते मय्येव वर्धतामभिवर्धताम् ॥ 61 ॥

यथा वैकुण्ठनगरे यथा वै क्षीरसागरे ।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ 62 ॥

योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना ।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ 63 ॥

नारायणस्य हृदये भवती यथास्ते
नारायणोऽपि तव हृत्कमले यथास्ते ।
नारायणस्त्वमपि नित्यविभू तथैव
तौ तिष्ठतां हृदि ममापि दयान्वितौ श्रीः ॥ 64 ॥

विज्ञानवृद्धिं हृदये कुरु श्रीः
सौभाग्यवृद्धिं कुरु मे गृहे श्रीः ।
दयासुवृष्टिं कुरुतां मयि श्रीः
सुवर्णवृष्टिं कुरु मे गृहे श्रीः ॥ 65 ॥

न मां त्यजेथाः श्रितकल्पवल्लि
सद्भक्ति चिन्तामणि कामधेनो ।

विश्वस्य मातर्भव सुप्रसन्ना
गृहे कलत्रेषु च पुत्रवर्गे ॥ 66 ॥

**॥ कुक्षिबीजं – ओं अं आं ईं एं ऐं ॥**

आद्यादिमाये त्वमजाण्डबीजं
त्वमेव साकार-निराकृतिस्त्वम् ।
त्वया धृताश्चाब्जभवाण्डसङ्घाः
चित्रं चरित्रं तव देवि विष्णोः ॥ 67 ॥

ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः ।
महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम् ॥ 68 ॥

अम्ब त्वद्वत्सवाक्यानि सूक्तासूक्तानि यानि च ।
तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥ 69 ॥

भवतीं शरणं गत्वा कृतार्थाः स्युः पुरातनाः ।
इति सञ्चिन्त्य मनसा त्वामहं शरणं व्रजे ॥ 70 ॥

अनन्ता नित्यसुखिनः त्वद्भक्तास्त्वत्परायणाः ।
इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे ॥ 71 ॥

तव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित् ।
इति सञ्चिन्त्य सञ्चिन्त्य प्राणान् सन्धारयाम्यहम् ॥ 72 ॥

त्वदधीनस्त्वहं मातः त्वत्कृपा मयि विद्यते ।
यावत् सम्पूर्णकामः स्यां तावद्देहि दयानिधे ॥ 73 ॥

क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना ।
न हि जीवन्ति जलजा जलं त्यक्त्वा जलग्रहाः ॥ 74 ॥

यथा हि पुत्रवात्सल्यात् जननी प्रस्नुतस्तनी ।
वत्सं त्वरितमागत्य सम्प्रीणयति वत्सला ॥ 75 ॥

यदि स्यां तव पुत्रोऽहं माता त्वं यदि मामकी ।
दयापयोधरस्तन्य सुधाभिरभिषिञ्च माम् ॥ 76 ॥

मृग्यो न गुणलेशोऽपि मयि दोषैकमन्दिरे ।
पांसूनां वृष्टिबिन्दूनां दोषाणां च न मे मतिः ॥ 77 ॥

पापिनामहमेकाग्रे दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ 78 ॥

विधिनाहं न सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥ 79 ॥

कृपा मदग्रजा किं ते अहं किं वा तदग्रजः ।
विचार्य देहि मे वित्तं तव देवि दयानिधे ॥ 80 ॥

माता पिता त्वं गुरुः सद्गतिः श्रीः त्वमेव सञ्जीवनहेतुभूता ।
अन्यं न मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्यम् ॥ 81 ॥

**॥ हृदयबीजं - ॐ घ्रां घ्रीं घ्रूं घ्रैं घ्रौं घ्रः हुं फट् कुरु कुरु स्वाहा ॥**

आद्यादि-लक्ष्मीर्भव सुप्रसन्ना
विशुद्धविज्ञान-सुखैकदोग्ध्री ।
अज्ञानहन्त्री त्रिगुणाति-रिक्ता
प्रज्ञाननेत्री भव सुप्रसन्ना ॥ 82 ॥

अशेष-वाग्जाड्य मलापहन्त्री नवं नवं स्पष्ट-सुवाक्प्रदायिनी ।
ममेह जिह्वाग्र सुरङ्ग-वर्तनी भव प्रसन्ना वदने च मे श्रीः ॥ 83 ॥

समस्त-सम्पत् सुविराजमाना समस्ततेजः सुविभासमाना ।
विष्णुप्रिये त्वं भव दीप्यमाना वाग्देवता मे भवने प्रसन्ना ॥ 84 ॥

सर्वप्रदर्शे सकलार्थदे त्वं प्रभासु-लावण्य-दयाप्रदोग्ध्री ।
सुवर्णदे त्वं सुमुखी भव श्रीः हिरण्मयी मे नयने प्रसन्ना ॥ 85 ॥

सर्वार्थदा सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभयापहन्त्री ।
सर्वोन्नता त्वं सुमुखी भव श्रीः हिरण्मयी मे वदने प्रसन्ना ॥ 86 ॥

समस्त-विघ्नौघ विनाशकारिणी समस्त-भक्तोद्धरणे विचक्षणा ।
अनन्त-सौभाग्य-सुखप्रदायिनी हिरण्मयी मे नयने प्रसन्ना ॥ 87 ॥

देवि प्रसीद दयनीयतमाय मह्यं
देवाधिनाथ भव देवगणाभि-वन्द्ये ।
मातस्तथैव भव सन्निहिता दृशोर्मे
पत्या समं मम मुखे भव सुप्रसन्ना ॥ 88 ॥

मा वत्स भैर भयदानकरोर्पितस्ते
मौलौ ममेति मयि दीनदयानुकम्पे ।
मातः समर्पय मुदा करुणाकटाक्षं
माङ्गल्यबीजमिह नः सृज जन्म मातः ॥ 89 ॥

**॥ कण्ठबीजं – ॐ श्रां श्रीं श्रूं श्रैं श्रौं श्रः ॥**

कटाक्ष इह कामधुक्तव मनस्तु चिन्तामणिः
करः सुरतरुः सदा नवनिधिस्त्वमेवेन्दिरे ।
भवेत्तव दयारसो मम रसायनं चान्वहं
मुखं तव कलानिधिः विविधवाञ्छितार्थप्रदम् ॥ 90 ॥

यथा रसस्पर्शनतोऽयसोऽपि सुवर्णता स्यात् कमले तथा ते ।
कटाक्षसंस्पर्शनतो जनानां अमङ्गलानामपि मङ्गलत्वम् ॥ 91 ॥

देहीति नास्तीति वचः प्रवेशाद् भीतो रमे त्वां शरणं प्रपद्ये ।
अतः सदाऽस्मिन्नभयप्रदा त्वं सहैव पत्या मयि सन्निधेहि ॥ 92 ॥

कल्पद्रुमेण मणिना सहिता सुरम्या

श्रीस्ते कला मयि रसेन रसायनेन ।
आस्तां यतो मम च दृक्करपाणिपाद
स्पृष्ट्याः सुवर्णवपुषः स्थिरजङ्गमाः स्युः ॥ 93 ॥

आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमेव पत्या मयि सन्निधेहि ।
आद्यादिलक्ष्मि त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात् ॥ 94 ॥

आद्यादिलक्ष्मीहृदयं पठेद्यः स राज्यलक्ष्मीमचलां तनोति ।
महादरिद्रोऽपि भवेद्धनाड्यः तदन्वये श्रीः स्थिरतां प्रयाति ॥ 95 ॥

यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा ।
तस्याभीष्टं ददत्याशु तं पालयति पुत्रवत् ॥ 96 ॥

इदं रहस्यं हृदयं सर्वकामफलप्रदम् ।
जपः पञ्चसहस्रं तु पुरश्चरणमुच्यते ॥ 97 ॥

त्रिकालमेककालं वा नरो भक्तिसमन्वितः ।
यः पठेत् श्रृणुयाद्वापि स याति परमां श्रियम् ॥ 98 ॥

महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे ।
इदं श्रीहृदयं जप्त्वा पञ्चवारं धनी भवेत् ॥ 99 ॥

अनेन हृदयेनान्नं गर्भिण्या अभिमन्त्रितम् ।
ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम् ॥ 100 ॥

नरेणाप्यथवा नार्या लक्ष्मीहृदयमन्त्रिते ।
जले पीते च तद्वंशे मन्दभाग्यो न जायते ॥ 101 ॥

य आश्वयुङ्मासि च शुक्लपक्षे रमोत्सवे सन्निहिते सुभक्त्या ।
पठेत्तथैकोत्तरवारवृद्ध्या लभेत् सौवर्णमयीं सुवृष्टिम् ॥ 102 ॥

य एकभक्त्यान्वहमेकवर्षं विशुद्धधीः सप्ततिवारजापी ।
स मन्दभाग्योऽपि रमाकटाक्षाद् भवेत् सहस्राक्ष-शताधिकश्रीः ॥ 103 ॥

श्रीशाङ्गिभक्तिं हरिदासदास्यं प्रसन्नमन्त्रार्थदृढैकनिष्ठाम् ।
गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मातः परमं पदं श्रीः ॥ 104 ॥

पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविधार्थसिद्धिम् ।
सम्पूर्णकीर्तिं बहुवर्षभोगं प्रदेहि मे लक्ष्मि पुनः पुनस्त्वम् ॥ 105 ॥

वादार्थसिद्धिं बहुलोकवश्यं वयः स्थिरत्वं ललनासु भोगम् ।
पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मनि ॥ 106 ॥

सुवर्णवृद्धिं कुरु मे गृहे श्रीः
सुधान्यवृद्धिं कुरू मे गृहे श्रीः ।
कल्याणवृद्धिं कुरु मे गृहे श्रीः
विभूतिवृद्धिं कुरु मे गृहे श्रीः ॥ 107 ॥

## ॥ शिरो बीजं – ॐ यं हं कं लं वं श्रीं ॥

ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां
विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं
भर्त्रायुक्तां मुहुरभयदां मह्यमप्यच्युत श्रीः ॥ 108 ॥

॥ ॐ नमो नारायणाय ॥

ॐ नारायणः परं ज्योतिरात्मा नारायणः परः ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते ॥ 1 ॥

नारायणः परो देवो धाता नारायणः परः ।
नारायणः परो ध्याता नारायण नमोऽस्तु ते ॥ 2 ॥

नारायणः परं धाम ध्यानं नारायणः परः ।
नारायण परो धर्मो नारायण नमोऽस्तु ते ॥ 3 ॥

नारायणः परो देवो विद्या नारायणः परः ।
विश्वं नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 4 ॥

नारायणाद् विधिर्जातो जातो नारायणाद् भवः ।
जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते ॥ 5 ॥

रविर्नारायणस्तेजः चन्द्रो नारायणो महः ।
वह्निर्नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 6 ॥

नारायण उपास्यः स्याद् गुरुर्नारायणः परः ।
नारायणः परो बोधो नारायण नमोऽस्तु ते ॥ 7 ॥

नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम् ।
हरिर्नारायणः शुद्धो नारायण नमोऽस्तु ते ॥ 8 ॥

निगमावेदितानन्तकल्याणगुणवारिधे ।
नारायण नमस्तेऽस्तु नरकार्णवतारक ॥ 9 ॥

जन्ममृत्युजराव्याधिपारतन्त्र्यादिभिः सदा ।
दोषैरस्पृष्टरूपाय नारायण नमोऽस्तु ते ॥ 10 ॥

वेदशास्त्रार्थविज्ञान साध्यभक्त्येकगोचर ।
नारायण नमस्तेऽस्तु मामुद्धर भवार्णवात् ॥ 11 ॥

नित्यानन्द महोदार परात्पर जगत्पते ।
नारायण नमस्तेऽस्तु मोक्षसाम्राज्यदायिने ॥ 12 ॥

आब्रह्मस्थम्बपर्यन्तं अखिलात्ममहाश्रय ।
सर्वभूतात्म भूतात्मन् नारायण नमोऽस्तु ते ॥ 13 ॥

पालिताशेष-लोकाय पुण्यश्रवण कीर्तन ।
नारायण नमस्तेऽस्तु प्रलयोदक शायिने ॥ 14 ॥

निरस्त सर्वदोषाय भक्त्यादि गुणदायिने ।
नारायण नमस्तेऽस्तु त्वां विना न हि मे गतिः ॥ 15 ॥

धर्मार्थ-काम-मोक्षाख्य पुरुषार्थ प्रदायिने ।
नारायण नमस्तेऽस्तु पुनस्तेऽस्तु नमो नमः ॥ 16 ॥

## प्रार्थना –

नारायण त्वमेवासि दहराख्ये हृदि स्थितः ।
प्रेरिता प्रेर्यमाणानां त्वया प्रेरित मानसः ॥ 17 ॥

त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ।
नानोपासन मार्गाणां भवकृद् भावबोधकः ॥ 18 ॥

भावार्थकृद् भवातीतो भव सौख्यप्रदो मम ।
त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितम् ॥ 19 ॥

त्वदधिष्ठान मात्रेण सा वै सर्वार्थकारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान् समर्थय ॥ 20 ॥

न मे त्वदन्यस्त्रातास्ति त्वदन्यन्न हि दैवतम् ।
त्वदन्यं न हि जानामि पालकं पुण्यवर्धनम् ॥ 21 ॥

यावत्सांसारिको भावो मनस्स्थो भावनात्मकः ।
तावत्सिद्धिर्भवेत् साध्या सर्वदा सर्वदा विभो ॥ 22 ॥

पापिनामहमेकाग्रो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ 23 ॥

त्वयाहं नैव सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो वा न सृष्टश्चेत् औषधस्य वृथोदयः ॥ 24 ॥

पापसङ्ग परिश्रान्तः पापात्मा पापरूपधृक् ।
त्वदन्यः कोऽत्र पापेभ्यः त्रातास्ति जगतीतले ॥ 25 ॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव सेव्यश्च गुरुस्त्वमेव त्वमेव सर्वं मम देव देव ॥ 26 ॥

**करन्यासः –**

नारायणः परं ज्योतिरात्मा नारायणः परः **अङ्गुष्ठाभ्यां नमः** ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते **तर्जनीभ्यां नमः** ।
नारायणः परो देवो धाता नारायणः परः **मध्यमाभ्यां नमः** ।
नारायणः परं धाम ध्यानं नारायणः परः **अनामिकाभ्यां नमः** ।

नारायण परो धर्मो नारायण नमोऽस्तु ते **कनिष्ठिकाभ्यां नमः** ।
विश्वं नारायणः साक्षान्नारायण नमोऽस्तु ते **करतलकरपृष्ठाभ्यां नमः** ।

**अङ्गन्यासः –**

नारायणः परं ज्योतिरात्मा नारायणः परः **हृदयाय नमः** ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते **शिरसे स्वाहा** ।
नारायणः परो देवो धाता नारायणः परः **शिखायै वौषट्** ।
नारायणः परं धाम ध्यानं नारायणः परः **कवचाय हुम्** ।
नारायण परो धर्मो नारायण नमोऽस्तु ते **नेत्रत्रयाय वौषट्** ।
विश्वं नारायणः साक्षान्नारायण नमोऽस्तु ते **अस्त्राय फट्** ।

ओं भूर्भुवस्वरों इति दिग्विमोकः ।

**ध्यानम् –**

उद्यदादित्यसङ्काशं पीतवासं चतुर्भुजम् ।
शङ्ख-चक्र-गदा-पाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ॥

त्रैलोक्याधारचक्रं तदुपरि कमठं तत्र चानन्तभोगी
तन्मध्ये भूमिपद्माङ्कुशशिखरदलं कर्णिकाभूत-मेरुम् ।
तत्रस्थं शान्तमूर्तिं मणिमयमकुटं कुण्डलोद्भासिताङ्गं
लक्ष्मीनारायणाख्यं सरसिजनयनं सन्ततं चिन्तयामः ॥

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

## फलस्तुतिः –

प्रार्थनादशकं चैव मूलाष्टकमतः परम् ।
यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥ 27 ॥

नारायणस्य हृदयं सर्वाभीष्ट फलप्रदम् ।
लक्ष्मीहृदयकं स्तोत्रम् यदि चैत्तद्विनाकृतम् ॥ 28 ॥

तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुद्ध्यति सर्वदा ।
एतत्सङ्कलितं स्तोत्रम् सर्वकामफलप्रदम् ॥ 29 ॥

जपेत् सङ्कलितं कृत्वा सर्वाभीष्टमवाप्नुयात् ।
नारायणस्य हृदयमादौ जप्त्वा ततः परम् ॥ 30 ॥

लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः ।
पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीनुतिं जपेत् ॥ 31 ॥

तद्वद्धोमादिकं कुर्यादेतत् सङ्कलितं शुभम् ।
एवं मध्ये द्विवारेण जपेत्सङ्कलितं शुभम् ॥ 32 ॥

लक्ष्मीहृदयके स्तोत्रे सर्वमन्यत् प्रकाशितम् ।
सर्वान्कामानवाप्नोति आधिव्याधिभयं हरेत् ॥ 33 ॥

गोप्यमेतत् सदा कुर्यात् न सर्वत्र प्रकाशयेत् ।
इति गुह्यतमं शास्त्रं प्रोक्त ब्रह्मादिभिः पुरा ॥ 34 ॥

लक्ष्मीहृदय प्रोक्तेन विधिना साधयेत् सुधीः ।
तस्मात् सर्व प्रयत्नेन साधयेत् गोपयेत् सुधीः ॥ 35 ॥

यत्रैतत्पुस्तकं तिष्ठेत् लक्ष्मीनारायणात्मकम् ।
भूतपैशाचवेताल भयं नैव तु सर्वदा ॥ 36 ॥

भृगुवारे तथा रात्रौ पूजयेत् पुस्तकद्वयम् ।
सर्वथा सर्वदा सत्यं गोपयेत् साधयेत् सुधीः ।
गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः ॥ 37 ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ 38 ॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिता ॥ 39 ॥

॥ इति श्रीअथर्वणरहस्ये उत्तरखण्डे श्रीलक्ष्मीनारायणहृदयस्तोत्रं सम्पूर्णम् ॥

पूर्ण आनन्द लहरि



॥ श्रीलक्ष्मीनारायण श्री पादुकां पूजयामि नमः ॥

# श्री लक्ष्मीनारायण मूलमन्त्र स्तोत्रम्

श्री भैरव उवाच –
अद्याहं तत्त्वसर्वस्वं रहस्यं परमार्थदम् ।
मन्त्रस्तोत्रं प्रवक्ष्यामि लक्ष्मीनारायणस्य ते ॥ 1 ॥

पञ्चमाङ्गं महादेवि परमार्थप्रकाशकम् ।
चतुर्वेदागमस्तुत्यं भोगमोक्षैककारणम् ॥ 2 ॥

गुह्यं गुप्ततरं तत्त्वं मन्त्रराजस्य पार्वति ।
कौलिकाकानां सदा संविदानन्दरसकारणम् ॥ 3 ॥

ॐ अस्य श्रीलक्ष्मीनारायणमन्त्रस्तोत्रराजस्य सदाशिव ऋषिः (शिरसि)।
त्रिष्टुप् छन्दः (मुखे) । श्रीलक्ष्मीनारायणो देवता (हृदये) ।

श्रीं बीजं (गुह्ये) । ह्रीं शक्तिः (पादयोः) । ॐ कीलकं (नाभौ) ।
श्री लक्ष्मीनारायण प्रसादेन भोगापवर्ग सिद्ध्यर्थे स्तवपाठे विनियोगः सर्वाङ्गे ॥

**करन्यासः -**

ह्रां श्रां अङ्गुष्ठाभ्यां नमः ।
ह्रीं श्रीं तर्जनीभ्यां नमः ।
ह्रूं श्रूं मध्यमाभ्यां नमः ।

ह्रैं श्रैं अनामिकाभ्यां नमः ।
ह्रौं श्रौं कनिष्ठिकाभ्यां नमः ।
ह्रः श्रः करतलकरपृष्ठाभ्यां नमः ।

**अङ्गन्यासः -**

ह्रां श्रां हृदयाय नमः ।
ह्रीं श्रीं शिरसे स्वाहा ।
ह्रूं श्रूं शिखायै वषट् ।
ह्रैं श्रैं कवचाय हुं ।
ह्रौं श्रौं नेत्रत्रयाय वौषट् ।
ह्रः श्रः अस्त्राय फट् ।

ओं भूर्भुवस्वरों इति दिग्बन्धः ॥

**ध्यानम् -**

पूर्णेन्दुवदनं पीतवाससं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥ 4 ॥

किरीटिनं कुण्डलहारमण्डितं पद्मासनं श्याममुखं चतुर्भुजम् ।
पीताम्बरं शङ्खगदाब्जचक्रपाणिं पुराणं पुरुषं भजे विभुम् ॥ 5 ॥

**पञ्चपूजा -**

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

ॐ प्रणवं यदि मानवो जपेद्धरिपादाम्बुजसेवनाकुलः ।
दनुजान्तकधाम याति नूनं परमानन्दमयो गतस्मयः ॥ 6 ॥

पराबीजं नुत्यं यदि जपति जन्तुर्जपभुवि
स्मराक्रान्तः स्मार्तागमकुटिलमार्गोज्झितभयः ।
भवेत् कौलेशानः सकलरिपुदावाग्निजलदः
सुरस्त्रीभिः सार्धं सुरविटपिवाटीषु रमते ॥ 7 ॥

विबीजं यो महामन्त्रं जपेदानन्दनिर्भरः ।
आनन्दरूपो भविता लक्ष्मीनारायणप्रियः ॥ 8 ॥

विभूतिबीजं मनुराजतत्त्वं जपेद्व्रतान्ते यदि कौलिकेन्द्रः ।
स याति देवासुरपूजिताङ्घ्रिः परं पदं सर्वसुरैरलभ्यम् ॥ 9 ॥

माबीजमन्तः परमार्थतत्त्वं सत्त्वैकरूपं मनसा जपेद्यः ।
स कामिनीकामरणप्रवीणो भवेदरीणामुरूदर्पहारी ॥ 10 ॥

रमाबीजं नामाक्षरपदमयं मन्त्रमुकुटं
जपेद्यो यन्त्राग्रे हरचरणपद्मार्पितमनाः ।
भवेद् भूभृन्मौलिस्फुरितमणिमालाम्शुनिवह
प्रभाभास्वत्पादः स धरणिधरेन्द्रो विजयवान् ॥ 11 ॥

नारायणायेति जपेन्मनुं यो
रात्रै प्रभाते परमार्थबीजम् ।
स वैरिदावानलवारिवाहो
भवेत् स गीर्भिर्गुरुगर्वहारी ॥ 12 ॥

विश्वं जपेद्यो हिदु विश्वसारं
विश्वम्भरध्यानपरः प्रभाते ।
साम्राज्यलक्ष्मीं स रिपून् विजित्य
मभेद् भुवि स्वर्गमतः परासुः ॥ 13 ॥

चतुरश्रवृत्तषोडशारवसुपत्राञ्चितकाश्रराश्रबिन्दौ ।
कमलाश्रितमीश्वरं निविष्टं परमानन्दमयं भजाम्यनन्तम् ॥ 14 ॥

**अङ्गन्यासः -**

ह्रां श्रां हृदयाय नमः ।
ह्रीं श्रीं शिरसे स्वाहा ।
ह्रूं श्रूं शिखायै वषट् ।

हैं श्रैं कवचाय हुं ।
हौं श्रौं नेत्रत्रयाय वौषट् ।
हः श्रः अस्त्राय फट् ।

ओं भूर्भुवस्वरों इति दिग्विमोकः ॥

## ध्यानम् -

पूर्णेन्दुवदनं पीतवाससं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥

किरीटिनं कुण्डलहारमण्डितं पद्मासनं श्याममुखं चतुर्भुजम् ।
पीताम्बरं शङ्खगदाब्जचक्रपाणिं पुराणं पुरुषं भजे विभुम् ॥

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

इति मन्त्रमयं पठेत् स्तवं यो हृदि नारायणवल्लभं प्रभाते ।

कमला विमलाशयस्य तस्य श्रुतिशीलस्य वशीभवत्यवश्यम् ॥ 15 ॥

इतीदं स्तोत्रमीशानि मूलमन्त्रमयं परम् ।
तव भक्त्या मयाख्यातं न चाख्येयं मुमुक्षुभिः ॥ 16 ॥

पञ्चाङ्गमिदमाद्यन्तं लक्ष्मीनारायणास्य ते ।
वर्णितं गोप्यमर्चाढ्यं गोपनीयं स्वयोनिवत् ॥ 17 ॥

श्रीदेव्युवाच –
भगवन् सर्वत्त्वज्ञ सर्वलोकहिते रत ।
क्रीतास्मि भवतानेन कथनेनास्य शङ्कर ॥ 18 ॥

लक्ष्मीनारायणस्याद्य श्रुवा पञ्चाङ्गमुत्तमम् ।
मयाप्तः परमानन्दो दास्यहं ते ब्रवीमि किम् ॥ 19 ॥

श्रीभैरव उवाच –
एतद्रहस्यमखिलं सर्वतत्रेषु गोपितम् ।
वेदानालोड्य तन्त्रांश्च देवि ते कथितं मया ॥ 20 ॥

देवानां दुलभं तत्त्वं पञ्चाङ्गं वैष्ण्वार्चिते ।
रहस्यं सर्वलोकानां सर्वस्वं मम पार्वति ॥ 21 ॥

अप्रकाश्यमवक्तव्यमदातव्यं दुरात्मने ।
देयं शिष्याय शान्ताय गुरुभक्तिपराय च ॥ 22 ॥

दानशीलाय भक्ताय कौलमार्गरताय च ।
महाचीनपदस्थाय वैष्णवाय महात्मने ॥ 23 ॥

दत्त्वा मुक्तिं लभेद् देवि भक्तानां परात्परम् ।
गोप्यं गुह्यं गोपनीयं चेत्याज्ञा पारमेश्वरी ॥ 24 ॥

॥ इति श्रीरुद्रयामले तन्त्रे श्रीलक्ष्मीनारायणस्तवाख्यानं संपूर्णम् ॥

पूर्ण आनन्द लहरि




॥ श्रीलक्ष्मीनारायण श्री पादुकां पूजयामि नमः ॥

# श्रीलक्ष्मीनारायण सहस्रनाम स्तोत्रम्

ओं शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

श्री भैरव उवाच –
अधुना कथयिष्यामि विद्यां साहस्रनामिकाम् ।
भोगदां मोक्षदां लोके लक्ष्मीनारायणस्य ते ॥ 1 ॥

श्रीभरवी उवाच –
भगवन् करुणाम्भोधे लक्ष्मीनारायणस्य मे ।
भोगापवर्गदं दिव्यं वद नामसहस्रकम् ॥ 2 ॥

सर्वमन्त्रमयं तत्त्वं सर्वपूजाफलप्रदम् ।
सर्वागमरहस्याढ्यं सर्वदेवैकवन्दितम् ॥ 3 ॥

श्री भैरव उवाच –
एतद्रहस्यं परमं मन्त्रनामसहस्रकम् ।
लक्ष्मीनारायणस्येष्टं सर्वस्वं तत्त्वतो मम ॥ 4 ॥

गुह्यं गोप्यतमं देवि सुखदं धर्मवर्धनम् ।
लक्ष्मीसंवननं लोके परत्र परमार्थदम् ॥ 5 ॥

महाचीनपदस्थानां कौलिकानामभीष्टदम् ।
उपपातकपापानां शमनं दमकारकम् ॥ 6 ॥

सर्वतीर्थफलाद्रिक्तं सर्वयज्ञाफलप्रदम् ।
सर्वदेवस्तुतं साध्यं चतुर्वर्गफलप्रदम् ॥ 7 ॥

अवाच्यं मार्गहीनानामश्रवं दुष्टचेतसाम् ।
वैष्णवः कौलिकश्रेष्ठः पठेन्नामसहस्रकम् ।
गुरूपदेशतो देवि सर्वसिद्धिमवाप्नुयात् ॥ 8 ॥

ॐ अस्य श्रीलक्ष्मीनारायणदिव्यसहस्रनामस्तोत्रमालामन्त्रस्य सदाशिव ऋषिः (शिरसि) ।
त्रिष्टुप् छन्दः (मुखे)। भगवान् श्रीलक्ष्मीनारायणो देवता (हृदये)।

श्रीं बीजं (गुह्ये) । ह्रीं शक्तिः (पादयोः) । ॐ कीलकं (नाभौ) ।
श्रीलक्ष्मनारायण प्रसादेन धर्मार्थकाममोक्षार्थे सहस्रनामजपे विनियोगः (सर्वाङ्गे) ॥

**करन्यासः -**

ह्रां श्रां अङ्गुष्ठाभ्यां नमः ।
ह्रीं श्रीं तर्जनीभ्यां नमः ।
ह्रूं श्रूं मध्यमाभ्यां नमः ।
ह्रैं श्रैं अनामिकाभ्यां नमः ।
ह्रौं श्रौं कनिष्ठिकाभ्यां नमः ।
ह्रः श्रः करतलकरपृष्ठाभ्यां नमः ।

## अङ्गन्यासः -

ह्रां श्रां हृदयाय नमः ।
ह्रीं श्रीं शिरसे स्वाहा ।
ह्रूं श्रूं शिखायै वषट् ।
ह्रैं श्रैं कवचाय हुं ।
ह्रौं श्रौं नेत्रत्रयाय वौषट् ।
ह्रः श्रः अस्त्राय फट् ।

ओं भूर्भुवस्वरों इति दिग्बन्धः ॥

## ध्यानम् -

पूर्णेन्दुवदनं पीतवाससं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥

वेदानुद्धरते जगन्तिवहते भूगोलमुद्बिभ्रते
दैत्यान् दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।
हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

ॐ लक्ष्मीविष्णुरीशानो लक्ष्मीकान्तो विनायकः ।
विश्वम्भरो विश्वनाथो विश्वसूर्विश्वसूदनः ॥ 1 ॥

लक्ष्मीराजो महात्मा च परमात्मा परापरः ।
अपारविभवो भव्यो भवभूतिमयो भवः ॥ 2 ॥

लक्ष्मीधवो महांल्लक्ष्मीदेवो लक्ष्मीभवोत्तमः ।
लक्ष्मीधराधरो लक्ष्मीधाराधरसमद्युतिः ॥ 3 ॥

विश्रुतो विकलो व्यग्रो विलासी गीतवल्लभः ।
विद्याधरप्रियो विद्यावादी विद्याविशारदः ॥ 4 ॥

पट्टभृत् पाटलद्योतः पीतपट्टधरो भगः ।
भाग्यवान् भोगदो भार्गो भृगुभावविवर्धनः ॥ 5 ॥

लक्ष्मीकौलेश्वरो लक्ष्मीगुह्यो लक्ष्मीविभावसुः ।
लक्ष्मीवीरेश्वरो लक्ष्मीधन्यो लक्ष्मीविभाकरः ॥ 6 ॥

अचिन्त्यो नित्यसंयोगी संयमी यमभीतिहृत् ।
यामिनीशप्रियकरो राहुध्वंसी विषापहः ॥ 7 ॥

धीरो भ्रमहरो भीमो भीमास्यो भीमवल्लभः ।
हारकङ्कणभूषाढ्यो मौलिमान् नूपुराञ्चितः ॥ 8 ॥

किङ्किणीरवसन्तुष्टो वंशीवादनतत्परः ।
स्थाणुरूपश्चरगतिश्चारुवक्रो जयी नयी ॥ 9 ॥

लक्ष्मीविनयवांल्लक्ष्मीजयवांल्ललिताकृतिः ।
लक्ष्मीनेत्रवशी लक्ष्मीहासवश्यो विनर्तकः ॥ 10 ॥

नाट्याप्रियो नटी नन्दी सर्ववित् सर्वसारभृत् ।
वासवो गोप्यमार्गेष्टो वैष्णवाचारतत्परः ॥ 11 ॥

आत्मा परात्मा ज्ञानात्मा लोकाध्यक्षः सुरेश्वरः ।
सत्यः स्तुत्यः शुचिर्नित्यो नित्यात्मा नित्यदर्शनः ॥ 12 ॥

पञ्चानादमयोऽनन्तः पञ्चमाचारवल्लभः ।
पञ्चमस्वरसङ्गीतः कीर्तिदो मोहनाशनः ॥ 13 ॥

लक्ष्मीपरः पुमांल्लक्ष्मीशक्तीभृद् भक्तितोषितः ।
लक्ष्मीयोगीश्वरो लक्ष्मीयोगदो भोगिनायकः ॥ 14 ॥

लक्ष्मीलोकेश्वरो लक्ष्मीवसुर्लक्ष्मीमनोहरः ।
अचिन्त्यमहिमाऽचिन्त्यगरिमा घोरनिस्वनः ॥ 15 ॥

सुखी सुखप्रदो दिव्यरूपो देवेश्वरेश्वरः ।
कामदेवो विश्ववैद्यो वेदविद् वेदनायकः ॥ 16 ॥

ऋग्रूपः सामगीतज्ञो यजुर्यज्ञभुजाम्पतिः ।
याज्ञिको यमिनां त्राता त्रिलोकजनजकोऽजरः ॥ 17 ॥

कामप्रदः कामिवरः कमनीयाकृतिः कुरुः ।
लक्ष्मीपृथुर्वसुप्रीतो लक्ष्मीश्रीदः श्रियःपतिः ॥ 18 ॥

लक्ष्मीकामो लक्ष्मणेशो लक्ष्मीरामोऽतिसुन्दरः ।
अनिर्वर्ती च निःसङ्गो निर्भयो निरुपद्रवः ॥ 19 ॥

निराभासो निराधारो निर्लेपो निरहङ्कृतिः ।
निराश्रयो निर्गुणश्च गुणातीतो गणेश्वरः ॥ 20 ॥

ब्रह्मस्वरूपो ब्रह्मज्ञो ब्रह्मणो ब्रह्मवर्धनः ।
महाक्रतुर्यज्ञवपुर्वराहो यज्ञनायकः ॥ 21 ॥

महारुद्रो महादेवो माधवो मधुसूदनः ।
लक्ष्मीनिरञ्जनो लक्ष्मीसिद्धिदः सिद्धिवर्धनः ॥ 22 ॥

लक्ष्मीश्रीवत्सवक्षाश्च लक्ष्मीकौस्तुभभूषितः ।
सर्वलोकधरो दान्तो दन्तिदन्तायुधो दमी ॥ 23 ॥

अप्रमेयगतिः शान्तः शमी कामी कृतागमः ।
महाकर्मा महाचीनो मकारशिवपूजितः ॥ 24 ॥

वाममार्गरसोद्रिक्तः सर्वाचारैकमध्यगः ।
मांसाहारी नित्यसङ्गी मीनासवरसाकुलः ॥ 25 ॥

मुद्राप्रियो रतानन्दरतो रतिपतिप्रियः ।
अघोरदेवो दैत्यारिर्जितदेवो दिवाकरः ॥ 26 ॥

निशानाथोऽमृतमयो नवग्रहसमर्चितः ।
सत्स्वरूपो विरूपाक्षो विभाकरशतप्रभः ॥ 27 ॥

निग्रहो विग्रही वामो वारांनिधिनिवासकः ।
पीनबाहुः स्थूलपादो दीर्घचक्षुरलम्भुजः ॥ 28 ॥

पादामिलक्रमातीतः सत्यसन्धः सनातनः ।
लक्ष्मीसनातनो लक्ष्मीधर्माध्यक्षो धनेश्वरः ॥ 29 ॥

लक्ष्मीधनप्रदो लक्ष्मीधर्मभागी च धर्मवान् ।
वीरहा पुण्डरीकाक्षः पद्मनाभो जगत्प्रभुः ॥ 30 ॥

पद्मासनो ब्रह्ममयो विस्मयी विगतस्मयः ।
समान समदृष्टिश्च विषमो विषमेक्षणः ॥ 31 ॥

चतुर्मूर्तिस्त्रिमूर्तिश्च चिन्तितश्चिञ्चिणीपतिः ।
सहस्त्रबाहुः क्षेत्रेशो ब्राह्मणो वणिजां पतिः ॥ 32 ॥

सर्वव्यापी सर्वमुखः सर्वमध्यगतः सखा ।
चक्रार्चितो नक्रपतिर्वरुणः शक्रसोदरः ॥ 33 ॥

दर्पहा सर्पशयनः सर्पाशनवरप्रदः ।
अमानी मानदो मान्यो मानवेन्द्रो मनूत्तमः ॥ 34 ॥

मनुवश्योऽमराध्यक्षो लक्ष्यो लोकैकरक्षकः ।
शोकहा दुर्गमो दृप्तो बलिहा कलिनाशनः ॥ 35 ॥

शुभाङ्गो मदिराक्षीबः शुभकृत् शोभनाकृतिः ।
अतिथिस्तिथिनाथश्च नक्षत्रपरिवेषगः ॥ 36 ॥

चतुर्बाहुश्चतुःश्रोत्रो विश्रवा विलयप्रदः ।
प्रलयान्तकरः प्राज्यो जननीजनकप्रियः ॥ 37 ॥

यशस्वी श्रीधरः शान्तः शङ्काशतविनाशकः ।
अक्रूरवरदः क्रूरः कीरवाग् गणनायकः ॥ 38 ॥

सुवर्णमुकुटो मारो मारसूर्मणिभूषणः ।
मान्त्रिको मञ्जुलो मन्त्री मान्त्रिकेष्टवरप्रदः ॥ 39 ॥

लक्ष्मीवितर्कवांल्लक्ष्मीसुन्दरो बन्धुरोऽभयः ।
अर्जितः सुखितस्तारस्तार्तीयः कार्तवीर्यकः ॥ 40 ॥

लक्ष्मीपद्मधरो लक्ष्मीचन्द्रहासो विकत्थनः ।
लक्ष्मीगोवर्धनधरो लक्ष्मीकम्बुधरो विराट् ॥ 41 ॥

स्कन्दाश्रयो रिपुध्वंसी देवसेनाधिनायकः ।
अनुकूलोऽनुकूटश्च सानुमान् सोमसुन्दरः ॥ 42 ॥

तामसः सात्त्विकः सभ्यः सोमराजो मरीचिमान् ।
अर्चिष्मान् विकलः कुल्यकल्पः सज्जनपोषकः ॥ 43 ॥

विराजो वामनो वेणुर्वानरो वारिवाहनः ।
वाल्मीकिवरदो वन्दी वन्द्यो बन्धूकसन्निभः ॥ 44 ॥

वर्णेश्वरो वर्णमाली वनमालातिसुन्दरः ।
भृगुर्भास्वद्वपुर्भोक्ता कर्ता हर्ता शतक्रतुः ॥ 45 ॥

अतुल्यः कोमलः कोपी रमणो मणिकुण्डलः ।
लक्ष्मीकेयूरवांल्लक्ष्मीमणिदामविराजितः ॥ 46 ॥

लक्ष्मीनूपुरवांल्लक्ष्मीमुक्तामाल्यविभूषणः ।
लक्ष्मीगोधाङ्गुलित्राणो लक्ष्मीसौवर्णकङ्कणः ॥ 47 ॥

लक्ष्मीविराजितो लक्ष्मीविविधाभरणोज्ज्वलः ।
ककारादिक्षकारान्तविद्याभूषणभूषितः ॥ 48 ॥

अकाराद्यक्षरस्फीतो निःशेषस्वरमण्डितः ।
वर्णमान्यो महाविद्यामातृकाक्षरतत्त्ववान् ॥ 49 ॥

लक्ष्मीकामेश्वरो लक्ष्मीकामुको निर्जरेश्वरः ।
कलावान् कीर्तिमान् कूतः कुम्भाण्डप्राणहारकः ॥ 50 ॥

केशान्तकः कालसूश्च कारकः कष्टहा कठी ।
क्रीतः कुब्जः कम्बुधरः कलकण्ठः कुलालकः ॥ 51 ॥

कुलाध्यक्षः कुलाचारी कुलाकुलपदार्चितः ।
करञ्जकः कर्तरीशः कनकः कर्तरीकरः ॥ 52 ॥

कलङ्करहितः कोकः कोकशोकनिवर्हणः ।
कपिलः कलशी कोलः कालिकः कुलमानसः ॥ 53 ॥

लक्ष्मीकुलाकुलो लक्ष्मीकुलजः कर्मवर्धनः ।
लक्ष्मीकाशीश्वरो लक्ष्मीनवनाथविनायकः ॥ 54 ॥

लक्ष्मीकनिष्ठो निष्पिष्टो लक्ष्मीयोगीन्द्रयोगदः ।
खपरः खेचरः खेटः खगगामी खलान्तकः ॥ 55 ॥

खरूपः खगरूपश्च खनित्रः खेटनायकः ।
खगायुधः खण्डधारी खञ्जनेक्षणभञ्जनः ॥ 56 ॥

खरध्वंसी खराराव: खर्खुराकारभीषणः ।
खंखटोलः खगगतिः खेचरेश्वरसेवितः ॥ 57 ॥

खेचरीगणसेव्यश्च खण्डमुद्रानियन्त्रितः ।
खड्गहस्तः खड्गपालः खेतः खवर्णभूषणः ॥ 58 ॥

लक्ष्मीखेशः खोकरूपो लक्ष्मीभास्वरमूर्तिमान् ।
लक्ष्मीखट्वाङ्गभृल्लक्ष्मीखेचरः खाश्मलेपितः ॥ 59 ॥

लक्ष्मीचिताग्निनिलयो लक्ष्मीभस्मीकृतानलः ।
लक्ष्मीभूतिप्रदो लक्ष्मीज्योतिष्मान् गाक्षराञ्चितः ॥ 60 ॥

लक्ष्मीगीतः स्वरालापी गोपतिर्गोकुलेश्वरः ।
गङ्गाधरप्रियो गोष्ठी गोपालो गन्धवर्धनः ॥ 61 ॥

गन्धवाहप्रियो गीतो गीतिज्ञो गीतलालसः ।
गुञ्जाहारप्रियो गण्डी गुरुर्गोवाहनोऽगदः ॥ 62 ॥

गाम्भीर्यवान् गुरुतरो गुरुशब्दविवर्धनः ।
गुरुभक्तिप्रियो गोलो गण्डशैलनिवासकः ॥ 63 ॥

गर्जन्नादो गोत्रपतिर्गोलमार्गप्रियोऽङ्गवान् ।
निरङ्गो गजवक्त्रेशो गणनायकनायकः ॥ 64 ॥

गन्धर्वनाथवरदो गगनेचरपूजितः ।
गर्भहीनो गर्भवाही गुणेयो गुणसागरः ॥ 65 ॥

गुणातीतवपुर्गुण्यो गुप्तमार्गप्रवर्तकः ।
गुप्तमन्त्रप्रियो गोप्यो गुह्यो गुह्यकवल्लभः ॥ 66 ॥

गोपीतो गिरिनाथश्च गिरिधारी जगन्निधिः ।
लक्ष्मीप्रियः प्रियः प्रीतो लक्ष्मीगरुडवाहनः ॥ 67 ॥

लक्ष्मीकपोतनिलयो लक्ष्मीकल्पद्रुमो रविः ।
लक्ष्मीसन्तानकः सारो लक्ष्मीसारो लतापतिः ॥ 68 ॥

लक्ष्मीग्राह्योऽसुलक्ष्मा च लक्ष्मीसागरनन्दनः ।
घृणी घृणिमयो घृष्टो घुसृणारक्त ईश्वरः ॥ 69 ॥

घृणामयोऽघहर्ता च घृणिनाथो घवर्णभाक् ।
लक्ष्मीचिन्तामणिः साधुर्लक्ष्मीवीरो वरोत्तमः ॥ 70 ॥

लक्ष्मीचतुर्भुजो लक्ष्मीविश्वनाथो विनायकः ।
ङवर्णोऽनन्तरूपश्च जानुज्ञो ङोणरूपवान् ॥ 71 ॥

ङवर्णरूपो विश्वेशो ङकाराक्षरमण्डनः ।
लक्ष्मीसेव्यो निर्गुणात्मा लक्ष्मीशानः शिवार्चितः ॥ 72 ॥

चारुरूपश्चारुगतिश्चारुमूर्तिश्चमत्कृतिः ।
चारुनेत्रश्चारुमुखश्चारुबाहुश्चतुर्भुजः ॥ 73 ॥

चारुहस्तश्चारुनखश्चारुकेशश्चमूपतिः ।
चितावासी चरोऽचेलश्चीनाम्बरधरोऽच्युतः ॥ 74 ॥

चारुहासश्चारुदन्तश्च्यवनश्चन्द्रवासितः ।
चन्द्रश्चन्द्रकलानाथश्चारुपादश्चतुर्गतिः ॥ 75 ॥

चतुरात्मा चतुर्थात्मा चतुर्भूमिधरो धरः ।
चतुःसमुद्रशयनः चतुस्सागरलङ्घनः ॥ 76 ॥

चतुर्द्युतिश्चतुःशय्याचतुर्वीरवरोऽवरः ।
चतुर्वेदमयो वैद्यश्चार्वङ्गश्चारुभाषणः ॥ 77 ॥

चतुर्वक्त्रश्चतुर्वक्त्रपूजितः परमेश्वरः ।
चलच्चन्द्रकशोभाढ्यश्चलन्नूपुरकूजितः ॥ 78 ॥

चलदम्भोदसदृशश्चलदम्भोजलोचनः ।
चलदम्भोदवदनश्चलदम्भोदशोभितः ॥ 79 ॥

चलत्कनककेयूरश्चलत्काञ्चनकुण्डलः ।
चलत्कनकशृङ्गाभश्चलत्कनकशेखरः ॥ 80 ॥

चकाररूपश्चारेशश्चकारार्णविभूषितः ।
लक्ष्मीशान्तो महादक्षो लक्ष्मीपीताम्बरः पविः ॥ 81 ॥

छत्री च्छत्रधरश्छान्तः छिन्नमस्ताप्रियः पिता ।
छन्नच्छेदी छिन्नमुखः छकाराक्षररूपवान् ॥ 82 ॥

लक्ष्मीकान्तः कान्तियुक्तो लक्ष्मीसाधक ईश्वरः ।
जगन्नाथो जगद्भर्ता जगत्कर्ता जगत्स्थितिः ॥ 83 ॥

जगत्क्षयकरो जेता जगतां पतिरुत्तमः ।
जगत्स्वामी जगद्धाता जगत्संहारकारकः ॥ 84 ॥

जीवात्मा परमात्मा च जगद्भूतिप्रदो भवः ।
जगद्गुणी जगत्स्तुत्यो जगदानन्ददायकः ॥ 85 ॥

जगत्सन्तोषभूतात्मा जगत्क्रोधदयान्वितः ।
जगद्दीप्तिकरो वेदोपासितो जगदीश्वरः ॥ 86 ॥

जवी जवान्वितो जारो जगदाडम्बरप्रदः ।
जगत्सेव्यो जगत्प्रीतो जगदिष्टो जगन्मयः ॥ 87 ॥

जृम्भणो जटिलो जीवो जम्भारातिवरप्रदः ।
जामाता जलधेर्जान्तो जटामुकुटमण्डितः ॥ 88 ॥

जितारिर्जयदोऽजेयो जयकृद्वीरतापनः ।
लक्ष्मीकुचतटासीनो लक्ष्मीनयनगोचरः ॥ 89 ॥

झल्लरीझोत्कृतो झाडी झण्डी शण्ठप्रतापनः ।
झाङ्कारी झङ्कृतिर्झिल्लीरवो झाङ्कारिनूपुरः ॥ 90 ॥

लक्ष्मीवरो महालक्ष्मीसेवितो देववन्दितः ।
ञकारो ञारलो ञेशो ञवर्णामृतरूपवान् ॥ 91 ॥

लक्ष्मीस्वभूः स्वर्गपतिर्लक्ष्मीवन्द्यो विधुन्तुदः ।
टकारो टङ्कहस्तश्च टान्तष्टीत्कारकूजितः ॥ 92 ॥

लक्ष्मीदेवो देवदेवो लक्ष्मीदान्तः कृपानिधिः ।
ठकुरो ठालको ठास्यो ठवर्णसुषमानिधिः ॥ 93 ॥

लक्ष्मीविधुर्वितर्काख्यो वैनतेयध्वजो ध्वजः ।
डमरुर्डामरेशानो डकाराक्षरसंयुतः ॥ 94 ॥

लक्ष्मीपतिः पावराङ्गो लक्ष्मीनायकनायकः ।
डकारवाग् ढक्कभेद्यो ढक्कासुरनिसूदनः ॥ 95 ॥

लक्ष्मीजेता जयकरो लक्ष्मीशो लम्बमूर्धजः ।
लक्ष्मीजगत्स्थितिर्लक्ष्मीशौरिर्लक्ष्मीगदाधरः ॥ 96 ॥

णान्तो णवर्णको णेशो णवर्णामृतसाधितः ।
लक्ष्मीदामोदरो लक्ष्मीप्राणो लक्ष्मीरथाङ्गभृत् ॥ 97 ॥

तुल्योऽतुल्यो महातुल्यचित्तस्तारार्णमण्डितः ।
तोतुलस्तुलसीनाथस्तन्त्रज्ञो मन्त्रनायकः ॥ 98 ॥

तपःफलप्रदस्ताम्ररूपोऽतुलपराक्रमः ।
तुटिरूपस्तुटिगतिस्तपस्वी तापसप्रियः ॥ 99 ॥

तुहिनांशुस्तुहिनजस्तुषारकरशोभितः ।
तुरीसेव्यस्तुलाभश्च तकाराक्षरमण्डनः ॥ 100 ॥

लक्ष्मीशङ्खायुधो लक्ष्मीनन्दकेशस्तवर्णभृत् ।
स्थविरः स्थूलगात्रश्च स्थाणुसेव्यस्थशब्दकृत् ॥ 101 ॥

स्थालीरसप्रियो स्थूलः स्थकारेश्वर ईश्वरः ।
लक्ष्मीजीवेश्वरो लक्ष्मीधरो लक्ष्मीनृसिंहकः ॥ 102 ॥

दयावान् द्युपतिर्दक्षो द्यूतो दम्भविवर्जितः ।
दारिद्र्यहा दुःखहर्ता दौर्भाग्यक्षयकृद् दयी ॥ 103 ॥

दीनो दीनप्रभुर्दम्भी दयितोदयवाञ्छकः ।
दानकृद् दातृफलदो दनुजेन्द्रक्षयङ्करः ॥ 104 ॥

दैत्यहा दैत्यदर्पघ्नो दर्पवादिक्षयङ्करः ।
दारप्रियो दीर्घनखो दुष्टासुरनिसूदनः ॥ 105 ॥

देवदेवो यशोवन्द्यो दकाराक्षरमण्डितः ।
लक्ष्मीदयाकरो लक्ष्मीदेवो लक्ष्मीदयानिधिः ॥ 106 ॥

धनदो धनकृद्धन्यो धनदेशो धनप्रदः ।
धृतिमान् धर्मवान् धर्मी धर्मकर्मविचक्षणः ॥ 107 ॥

धर्माध्यक्षो धनाध्यक्षो धवलो धैर्यवान् धनी ।
धीरो धैर्यकरो धर्मदक्षो धनदपूजितः ॥ 108 ॥

लक्ष्मीधनी महालक्ष्मीधवो लक्ष्मीमनोभवः ।
नवीनो नूतनो नम्रो नटनो नाट्यतोषितः ॥ 109 ॥

नगो नागनगश्रेष्ठो नृगम्यो नागमण्डनः ।
नृसिंहो नृवरोऽनन्तो नरनारायणो नवः ॥ 110 ॥

नागराजो नागपतिर्नागान्तकध्वजोऽनलः ।
नगारूढो निम्ननाभिर्नन्दिसेव्यो नटेश्वरः ॥ 111 ॥

नलिनाक्षो नृवन्द्योऽपि नायको नागनायकः ।
नर्मदातीरक्रीडाकृन्नलिनीपतिलोचनः ॥ 112 ॥

नरेशो नृपपूज्यश्च नागशायी नगोत्तमः ।
नारायणो निष्कलङ्को नवर्णाकृतिरात्मवान् ॥ 113 ॥

लक्ष्मीनागो नगधरो लक्ष्मीनाथो नरूपवान् ।
पुष्पप्रियः पुष्पशययाशयानः पुष्पशेखरः ॥ 114 ॥

पुष्पधन्वा प्रद्युम्नश्च पुष्पेषुपुष्पपूजितः ।
पूज्यः पवित्रं परमं परमेष्ठी पितामहः ॥ 115 ॥

परं पदं परं पुण्यं परमायुः परात्परः ।
पारावारसुताभर्ता परमेशः परं महः ॥ 116 ॥

पुण्यदः पुण्यकृत् पूतः पुराणागमपूजितः ।
पुराणपुरुषः पीनः पीनवक्षा जितेन्द्रियः ॥ 117 ॥

पीतवासाः पीतमालः पीतवर्णः पराङ्कुशः ।
पत्रगो विश्रुतः पान्थः पथिकः पान्थतोषदः ॥ 118 ॥

पूर्वः पौरजनस्तुत्यः पवर्णाक्षरमण्डनः ।
लक्ष्मीपीताम्बरो लक्ष्मीपीतो लक्ष्मीपरः परम् ॥ 119 ॥

फलं फणिवरः स्फीतः फलकृत् फलदः फणी ।
फणिशय्याशयानश्च फकारामृतमण्डनः ॥ 120 ॥

बालको बुद्धिमान् बौद्धो बन्धुर्बान्धव ईश्वरः ।
लक्ष्मीबन्धुर्महालक्ष्मीबान्धवो लक्षणान्वितः ॥ 121 ॥

भद्रपदो भास्वराङ्गो भास्करो भानुरव्ययः ।
भानिधिर्भगवान् भीतो भीतिहाऽभयदायकः ॥ 122 ॥

लक्ष्मीभयहरो लक्ष्मीभयदो भयघातनः ।
महेश्वरो महामान्यो महामात्यो मनोरमः ॥ 123 ॥

मनोहारी महाशान्तो महातेजा मनोजवः ।
महोत्साही माधवश्च मायाधारी मनोन्मनः ॥ 124 ॥

मानदो मुरघाती च मानवेष्टफलप्रदः ।
मदिरामोदमुदितो मारमोहविवर्जितः ॥ 125 ॥

लक्ष्मीमहोदयो लक्ष्मीमान्यो लक्ष्मीमदालसः ।
यशोदानन्दनो यान्तो यशस्वी योधसैनिकः ॥ 126 ॥

यशोधरो यमो योगी योगिनां योगदायकः ।
योगेन्द्रो यागपूज्यश्च यादवो यादवेश्वरः ॥ 127 ॥

यज्ञप्रीतो यज्ञनिधिर्याजको याज्ञिकप्रियः ।
यज्वा यज्ञो यशोजातो यकाराक्षररूपवान् ॥ 128 ॥

लक्ष्मीयज्ञकरो लक्ष्मीयाज्ञिको यज्ञसेवितः ।
राजा रमापतिर्देवो रामो राजा रजोरजः ॥ 129 ॥

राजसो रात्रिकृद्रामो रामानन्दप्रदायकः ।
रेवतीरमणो राकापतिः सर्वकलाधरः ॥ 130 ॥

लक्ष्मीरामो महालक्ष्मीराजा लक्ष्मीत्रिविक्रमः ।
लाक्षारुणो लीतराक्षो ललज्जिह्वो लतापतिः ॥ 131 ॥

लङ्केशो लासिको लान्तो लम्बोदरप्रियः परः ।
लक्ष्मीलीनोऽलिवर्णश्च लकाराकार ईश्वरः ॥ 132 ॥

वान्तदो वारसेनानीर्वराहो विग्रही विराट् ।
विष्णुर्वसुन्धरानाथो वसुदो वसुधाधिपः ॥ 133 ॥

वागीश्वरो वेणुहस्तो वेतालो विरसो वियत् ।
विद्वान् विशालनयनो विकारोऽविकृतिः पुमान् ॥ 134 ॥

वितर्की विनयी विद्याराजमान्यो विचारकः ।
वाग्मी वानीरमूलस्थो वाचाटो वीरनायकः ॥ 135 ॥

लक्ष्मीवराहो वीरेशो लक्ष्मीवीरो वनेचरः ।
शङ्करः श्रीधरः श्रीलः श्रमी शीतांशुशीतलः ॥ 136 ॥

शशिमौलिः शरन्नागः शम्भुः शङ्खनिमूदनः ।
शक्रः शत्रुक्षयकरः शत्रुकालकरः शिवः ॥ 137 ॥

लक्ष्मीशिवः श्रीपतिः श्रीवरो लक्ष्मीशिवप्रदः ।
षोडशस्वररूपश्च षोडशार्णविभूषणः ॥ 138 ॥

षडङ्गविद्यावेत्ता च षकाराक्षरभूषितः ।
लक्ष्मीषडङ्गधारी च लक्ष्मीषोडशवर्णभृत् ॥ 139 ॥

सुन्दरः स्वर्गवसतिः सर्वेशः सर्वतोमुखः ।
सप्तसप्तिः सदाचारः साधुः साधुजनप्रियः ॥ 140 ॥

सरमः सरलः सालः सुखी सुखविवर्धनः ।
सप्तद्वीपवतीनाथः सप्तसागरनायकः ॥ 141 ॥

सप्तस्वरमयः सप्तपातालतलवासकः ।
सात्त्विकः सत्त्वसंपन्नः समस्तदुरितापहः ॥ 142 ॥

समस्तरिपुविध्वंसी समस्तासुरघातनः ।
समस्तपातकध्वंसी समस्तसुरवन्दितः ॥ 143 ॥

लक्ष्मीसनातनो लक्ष्मीसनकः साधुपूजितः ।
हरिर्हरो हरिहरो हाटकेशो हटापहः ॥ 144 ॥

हरिद्रवर्णो हसितो हारी हरितलोचनः ।
लक्ष्मीहरिर्हृषीकेशो लक्ष्मीहारधरोऽनघः ॥ 145 ॥

क्षमी क्षमापतिः क्षत्ता क्षमेशश्च क्षवर्णभाक् ।
क्षणकृत् क्षणदानाथः क्षमावान् क्षुभितासुरः ॥ 146 ॥

लक्ष्मीक्षमायुतो लक्ष्मीक्षत्ता लक्ष्मीक्षवर्णभृत् ।
अनन्तोऽनन्तपूज्यश्चाप्यादिरादित्यसन्निभः ॥ 147 ॥

इन्दिरावल्लभो देव ईश्वरश्चोग्ररूपवान् ।
ऊष्मोज्ज्वलोऽपि ऋणहा ॠकारोज्ज्वलमातृकः ॥ 148 ॥

ऌवर्णवर्णो ॡकार एनवर्णसमन्वितः ।
ऐश्वर्यसहितश्चोष्ठस्तथौन्मत्तस्वरार्चितः ॥ 149 ॥

अंकारश्चैवमःकारस्वरूपः स्वरभूषितः ।
ओंह्लींहसौः ह्रींश्रींदेवो लक्ष्मीनारायणः शिवः ॥ 150 ॥

## अङ्गन्यासः -

ह्रां श्रां हृदयाय नमः ।
ह्रीं श्रीं शिरसे स्वाहा ।
ह्रूं श्रूं शिखायै वषट् ।
ह्रैं श्रैं कवचाय हुं ।
ह्रौं श्रौं नेत्रत्रयाय वौषट् ।
ह्रः श्रः अस्त्राय फट् ।

ओं भूर्भुवस्वरों इति दिग्विमोकः ॥

## ध्यानम् -

पूर्णेन्दुवदनं पीतवाससं कमलासनम् ।
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥

वेदानुद्धरते जगन्तिवहते भूगोलमुद्बिभ्रते
दैत्यान् दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

## पञ्चपूजा -

लं पृथिव्यात्मने गन्धं कल्पयामि ।

हं आकाशात्मने पुष्पाणि कल्पयामि ।
यं वाय्वात्मने धूपं कल्पयामि ।
रं अग्न्यात्मने दीपं कल्पयामि ।
वं अमृतात्मने अमृतं महानैवेद्यं कल्पयामि ।
सं सर्वात्मने समस्तोपचारपूजान् कल्पयामि ।

इति मन्त्रमयं नाम्नां सहस्रं तत्त्वमुत्तमम् ।
अकारादिक्षकारान्तविद्यानिलयमीश्वरि ॥ 151 ॥

सर्वतीर्थमयं सर्वदेवदानवपूजितम् ।
अश्वमेधसहस्राणि वाजपेयस्य कोटयः ॥ 152 ॥

चन्द्रायणायुतं देवि महादानान्यनेकशः ।
मन्त्रनामसहस्रस्य कलां नार्हन्ति षोडशीम् ॥ 153 ॥

अर्धरात्रे पठेद्वीरः शक्तिवक्षः स्थितः शनैः ।
स्वप्ने लक्ष्मीप्रियं देवं वरदं सोऽपि पश्यति ॥ 154 ॥

महाचीनार्चं कृत्वा पठेद्वीरार्चने सकृत् ।
शतवर्षसहस्राणि पूजायाः फलमाप्नुयात् ॥ 155 ॥

एकवारं पठेद्यस्तु संपूज्य गुरुंसन्निधौ ।
स भवेत् साधकः श्रीमान् परत्र त्रिविदं व्रजेत् ॥ 156 ॥

पुण्यदं वरदं नुत्यं तीर्थसाधनमुत्तमम् ।
योगिनां योगदं पूज्यं भोगिनां भोगवर्धनम् ॥ 157 ॥

रोगिणां रोगशमनं सर्वदुष्कृतनाशनम् ।
वैष्णवानां प्रियतरं मुक्तानां परमार्थदम् ॥ 158 ॥

अदातव्यमश्रोतव्यमन्यशिष्याय पार्वति ।
विना दानं न गृह्णीयान्न दद्याद् दक्षिणां विना ॥ 159 ॥

दत्वा गृहीत्वाप्युभयोः सिद्धिहानिर्भवेद् धृवम् ।
इदं नामसहस्रं तु लक्ष्मीनारायणस्य ते ।
तव भक्त्या मयाख्यातं गोपनीयं स्वयोनिवत् ॥ 160 ॥

॥ इति श्रीरुद्रयामले तन्त्रे श्रीलक्ष्मीनारायण सहस्रनाम स्तोत्रं सम्पूर्णम् ॥

पूर्ण आनंद लहरि



॥ श्रीलक्ष्मीनारायण श्री पादुकां पूजयामि नमः ॥

# श्रीलक्ष्मीनारायण सहस्रनामावलिः

ओं लक्ष्मीविष्णवे नमः ।
ओं ईशानाय नमः ।
ओं लक्ष्मीकान्ताय नमः ।
ओं विनायकाय नमः ।
ओं विश्वम्भराय नमः ।
ओं विश्वनाथाय नमः ।
ओं विश्वसुवे नमः ।
ओं विश्वसूदनाय नमः ।
ओं लक्ष्मीराजाय नमः ।
ओं महात्मने नमः । (10)
ओं परमात्मने नमः ।
ओं परापराय नमः ।
ओं अपारविभवाय नमः ।
ओं भव्याय नमः ।
ओं भवभूतिमयाय नमः ।
ओं भवाय नमः ।
ओं लक्ष्मीधवाय नमः ।
ओं महालक्ष्मीदेवाय नमः ।
ओं लक्ष्मीभवोत्तमाय नमः ।
ओं लक्ष्मीधराधराय नमः । (20)
ओं लक्ष्मीधाराधराय नमः ।

ओं समद्युतये नमः ।
ओं विश्रुताय नमः ।
ओं विकलव्यग्राय नमः ।
ओं विलासिने नमः ।
ओं गीतवल्लभाय नमः ।
ओं विद्याधरप्रियाय नमः ।
ओं विद्यावादिने नमः ।
ओं विद्याविशारदाय नमः ।
ओं पट्टभृते नमः । (30)
ओं पाटलद्योताय नमः ।
ओं पीतपट्टधराय नमः ।
ओं भगाय नमः ।
ओं भाग्यवते नमः ।
ओं भोगदत् भार्गाय नमः ।
ओं भृगुभावविवर्धनाय नमः ।
ओं लक्ष्मीकौलेश्वराय नमः ।
ओं लक्ष्मीगुह्याय नमः ।
ओं लक्ष्मीविभावसे नमः ।
ओं लक्ष्मीवीरेश्वराय नमः । (40)
ओं लक्ष्मीधन्याय नमः ।
ओं लक्ष्मीविभाकराय नमः ।

ओं अचिन्त्याय नमः ।
ओं नित्यसंयोगिने नमः ।
ओं संयमिने नमः ।
ओं यमभीतिहृदे नमः ।
ओं यामिनीशप्रियकराय नमः ।
ओं राहुध्वंसिने नमः ।
ओं विषापहाय नमः ।
ओं धीराय नमः । (50)
ओं भ्रमहराय नमः ।
ओं भीमभीमास्याय नमः ।
ओं भीमवल्लभाय नमः ।
ओं हारकङ्कणभूषाढ्याय नमः ।
ओं मौलिमते नमः ।
ओं नूपुराञ्चिताय नमः ।
ओं किङ्किणीरवसन्तुष्टाय नमः ।
ओं वंशीवादनतत्पराय नमः ।
ओं स्थाणुरूपाय नमः ।
ओं चरगतिने नमः । (60)
ओं चारुवक्त्राय नमः ।
ओं जयिने नमः ।
ओं नयिने नमः ।
ओं लक्ष्मीविनयवते नमः ।
ओं लक्ष्मीजयवते नमः ।
ओं ललिताकृतिने नमः ।

ओं लक्ष्मीनेत्रवशिने नमः ।
ओं लक्ष्मीहासवश्याय नमः ।
ओं विनर्तकाय नमः ।
ओं नाट्याप्रियाय नमः । (70)
ओं नट्याय नमः ।
ओं नन्दिने नमः ।
ओं सर्वविदे नमः ।
ओं सर्वसारभृते नमः ।
ओं वासवाय नमः ।
ओं गोप्यमार्गेष्टाय नमः ।
ओं वैष्णवाचारतत्पराय नमः ।
ओं आत्मने नमः ।
ओं परात्मने नमः ।
ओं ज्ञानात्मने नमः । (80)
ओं लोकाध्यक्षाय नमः ।
ओं सुरेश्वराय नमः ।
ओं सत्यस्तुत्याय नमः ।
ओं शुचिनित्याय नमः ।
ओं नित्यात्मने नमः ।
ओं नित्यदर्शनाय नमः ।
ओं पञ्चानादमयाय नमः ।
ओं अनन्ताय नमः ।
ओं पञ्चमाचार-वल्लभाय नमः ।
ओं पञ्चमस्वर-सङ्गीताय नमः । (90)

ओं कीर्तिदाय नमः ।
ओं मोहनाशनाय नमः ।
ओं लक्ष्मीपराय नमः ।
ओं पुमवते नमः ।
ओं लक्ष्मीशक्तीभृते नमः ।
ओं भक्तितोषिताय नमः ।
ओं लक्ष्मीयोगीश्वराय नमः ।
ओं लक्ष्मीयोगदाय नमः ।
ओं भोगिनायकाय नमः ।
ओं लक्ष्मीलोकेश्वराय नमः । (100)
ओं लक्ष्मीवसवे नमः ।
ओं लक्ष्मीमनोहराय नमः ।
ओं अचिन्त्यमहिमाय नमः ।
ओं अचिन्त्यगरिमाय नमः ।
ओं घोरनिस्वनाय नमः ।
ओं सुखी सुखप्रदाय नमः ।
ओं दिव्यरूपाय नमः ।
ओं देवेश्वरेश्वराय नमः ।
ओं कामदेवाय नमः ।
ओं विश्ववैद्याय नमः । (110)
ओं वेदविदे नमः ।
ओं वेदनायकाय नमः ।
ओं ऋग्रूपाय नमः ।
ओं सामगीतज्ञाय नमः ।
ओं यजुर्यज्ञभुजाम्पतये नमः ।
ओं याज्ञिकाय नमः ।
ओं यमिनां त्राताय नमः ।
ओं त्रिलोकजनजकाय नमः ।
ओं अजराय नमः ।
ओं कामप्रदाय नमः । (120)
ओं कामिवराय नमः ।
ओं कमनीयाकृतिने नमः ।
ओं कुरवे नमः ।
ओं लक्ष्मीपृथवे नमः ।
ओं वसुप्रीताय नमः ।
ओं लक्ष्मीश्रीदाय नमः ।
ओं श्रियःपतये नमः ।
ओं लक्ष्मीकामाय नमः ।
ओं लक्ष्मणेशाय नमः ।
ओं लक्ष्मीरामाय नमः । (130)
ओं अतिसुन्दराय नमः ।
ओं अनिर्वर्तिने नमः ।
ओं निःसङ्गाय नमः ।
ओं निर्भयाय नमः ।
ओं निरुपद्रवाय नमः ।
ओं निराभासाय नमः ।
ओं निराधाराय नमः ।
ओं निर्लेपाय नमः ।

ओं निरहङ्कृत्याय नमः ।
ओं निराश्रयाय नमः । (140)
ओं निर्गुणाय नमः ।
ओं गुणातीताय नमः ।
ओं गणेश्वराय नमः ।
ओं ब्रह्मस्वरूपाय नमः ।
ओं ब्रह्मज्ञाय नमः ।
ओं ब्रह्मणाय नमः ।
ओं ब्रह्मवर्धनाय नमः ।
ओं महाक्रतवे नमः ।
ओं यज्ञवपु नमः ।
ओं वराहाय नमः । (150)
ओं यज्ञनायकाय नमः ।
ओं महारुद्राय नमः ।
ओं महादेवाय नमः ।
ओं माधवाय नमः ।
ओं मधुसूदनाय नमः ।
ओं लक्ष्मीनिरञ्जनाय नमः ।
ओं लक्ष्मीसिद्धिदाय नमः ।
ओं सिद्धिवर्धनाय नमः ।
ओं लक्ष्मीश्रीवत्सवक्षाय नमः ।
ओं लक्ष्मीकौस्तुभभूषिताय नमः ।
(160)
ओं सर्वलोकधराय नमः ।

ओं दान्ताय नमः ।
ओं दन्तिदन्तायुधाय नमः ।
ओं दमिने नमः ।
ओं अप्रमेयगतिने नमः ।
ओं शान्तः शमिने नमः ।
ओं कामिने नमः ।
ओं कृतागमाय नमः ।
ओं महाकर्माय नमः ।
ओं महाचीनाय नमः । (170)
ओं मकारशिवपूजिताय नमः ।
ओं वाममार्गरसोद्रिक्ताय नमः ।
ओं वामाचारैकमध्यगाय नमः ।
ओं मांसाहारिणे नमः ।
ओं नित्यसङ्गीने नमः ।
ओं मीनासवरसाकुलाय नमः ।
ओं मुद्राप्रियाय नमः ।
ओं रतानन्दरताय नमः ।
ओं रतिपतिप्रियाय नमः ।
ओं अघोरदेवाय नमः । (180)
ओं दैत्यारिणे नमः ।
ओं जितदेवाय नमः ।
ओं दिवाकराय नमः ।
ओं निशानाथाय नमः ।
ओं अमृतमयाय नमः ।

ओं नवग्रहसमर्चिताय नमः ।
ओं सत्स्वरूपाय नमः ।
ओं विरूपाक्षाय नमः ।
ओं विभाकरशतप्रभाय नमः ।
ओं निग्रहविग्रहाय नमः । (190)
ओं वामाय नमः ।
ओं वारांनिधिनिवासकाय नमः ।
ओं पीनबाहवे नमः ।
ओं स्थूलपादाय नमः ।
ओं दीर्घचक्षुरलम्भुजाय नमः ।
ओं पादामिलक्रमातीताय नमः ।
ओं सत्यसन्धाय नमः ।
ओं सनातनाय नमः ।
ओं लक्ष्मीसनातनाय नमः ।
ओं लक्ष्मीधर्माध्यक्षाय नमः । (200)
ओं धनेश्वराय नमः ।
ओं लक्ष्मीधनप्रदाय नमः ।
ओं लक्ष्मीधर्मभागाय नमः ।
ओं धर्मवते नमः ।
ओं वीरहाय नमः ।
ओं पुण्डरीकाक्षाय नमः ।
ओं पद्मनाभाय नमः ।
ओं जगत्प्रभवे नमः ।
ओं पद्मासनाय नमः ।

ओं ब्रह्ममयाय नमः । (210)
ओं विस्मयिने नमः ।
ओं विगतस्मयाय नमः ।
ओं समान समदृष्टिने नमः ।
ओं विषमाय नमः ।
ओं विषमेक्षणाय नमः ।
ओं चतुर्मूतये नमः ।
ओं त्रिमूर्तये नमः ।
ओं चिन्तिताय नमः ।
ओं चिञ्चिणीपतये नमः ।
ओं सहस्रबाहवे नमः । (220)
ओं क्षेत्रेशाय नमः ।
ओं ब्राह्मणाय नमः ।
ओं वणिजांपतये नमः ।
ओं सर्वव्यापिने नमः ।
ओं सर्वमुखाय नमः ।
ओं सर्वमध्यगताय नमः ।
ओं सखाय नमः ।
ओं चक्रार्चिताय नमः ।
ओं नक्रपतये नमः ।
ओं वरुणाय नमः । (230)
ओं शक्रसोदराय नमः ।
ओं दर्पहाय नमः ।
ओं सर्पशयनाय नमः ।

ओं सर्पाशनवरप्रदाय नमः ।
ओं अमानिने नमः ।
ओं मानदाय नमः ।
ओं मान्याय नमः ।
ओं मानवेद्राय नमः ।
ओं मनूत्तमाय नमः ।
ओं मनुवश्याय नमः । (240)
ओं अमराध्यक्षाय नमः ।
ओं लक्ष्याय नमः ।
ओं लोकैकरक्षकाय नमः ।
ओं शोकहाय नमः ।
ओं दुर्गमाय नमः ।
ओं दृप्ताय नमः ।
ओं बलिहाय नमः ।
ओं कलिनाशनाय नमः ।
ओं शुभाङ्गाय नमः ।
ओं मदिराक्षीबाय नमः । (250)
ओं शुभकृते नमः ।
ओं शोभनाकृतिने नमः ।
ओं अतिथ्याय नमः ।
ओं तिथिनाथाय नमः ।
ओं नक्षत्रपरिवेषगाय नमः ।
ओं चतुर्बाहवे नमः ।
ओं चतुःश्रोत्राय नमः ।
ओं विश्रवाय नमः ।
ओं विलयप्रदाय नमः ।
ओं प्रलयान्तकराय नमः । (260)
ओं प्राज्याय नमः ।
ओं जननीजनकप्रियाय नमः ।
ओं यशस्विने नमः ।
ओं श्रीधराय नमः ।
ओं शान्ताय नमः ।
ओं शङ्काशतविनाशकाय नमः ।
ओं अक्रूरवरदाय नमः ।
ओं क्रूराय नमः ।
ओं कीरवागिणे नमः ।
ओं गणनायकाय नमः । (270)
ओं सुवर्णमुकुटाय नमः ।
ओं माराय नमः ।
ओं मारसुवे नमः ।
ओं मणिभूषणाय नमः ।
ओं मान्त्रिकाय नमः ।
ओं मञ्जुलाय नमः ।
ओं मन्त्रिणे नमः ।
ओं मान्त्रिकेष्टवरप्रदाय नमः ।
ओं लक्ष्मीवितर्कवानये नमः ।
ओं लक्ष्मीसुन्दराय नमः । (280)
ओं बन्धुराय नमः ।

ओं अभयाय नमः ।
ओं अर्जिताय नमः ।
ओं सुखिताय नमः ।
ओं तारस्तार्तीयाय नमः ।
ओं कार्तवीर्यकाय नमः ।
ओं लक्ष्मीपद्मधराय नमः ।
ओं लक्ष्मीचन्द्रहासाय नमः ।
ओं विकत्थनाय नमः ।
ओं लक्ष्मीगोवर्धनधराय नमः । (290)
ओं लक्ष्मीकम्बुधराय नमः ।
ओं विराजे नमः ।
ओं स्कन्दाश्रयाय नमः ।
ओं रिपुध्वंसिने नमः ।
ओं देवसेनाधिनायकाय नमः ।
ओं अनुकूलाय नमः ।
ओं अनुकूटाय नमः ।
ओं सानुमाते नमः ।
ओं सोमसुन्दराय नमः ।
ओं तामसाय नमः । (300)
ओं सात्त्विकाय नमः ।
ओं सभ्याय नमः ।
ओं सोमराजाय नमः ।
ओं मरीचिमते नमः ।
ओं अर्चिष्मते नमः ।

ओं विकलाय नमः ।
ओं कुल्यकल्पाय नमः ।
ओं सज्जनपोषकाय नमः ।
ओं विराजाय नमः ।
ओं वामनाय नमः । (310)
ओं वेणुर्वानराय नमः ।
ओं वारिवाहनाय नमः ।
ओं वाल्मीकिवरदाय नमः ।
ओं वन्दिने नमः ।
ओं वन्द्याय नमः ।
ओं बन्धूकसन्निभाय नमः ।
ओं वर्णेश्वराय नमः ।
ओं वर्णमालिने नमः ।
ओं वनमालातिसुन्दराय नमः ।
ओं भृगुर्भास्वद्वपुर्भोक्ताय नमः ।
(320)
ओं कर्ताय नमः ।
ओं हर्ताय नमः ।
ओं शतक्रतवे नमः ।
ओं अतुल्यकोमलाय नमः ।
ओं कोपिने नमः ।
ओं रमणाय नमः ।
ओं मणिकुण्डलाय नमः ।
ओं लक्ष्मीकेयूरवते नमः ।

ओं लक्ष्मीमणिदामविराजिताय नमः ।
ओं लक्ष्मीनूपुरवते नमः । (330)
ओं लक्ष्मी-मुक्तामाल्य-विभूषणाय नमः ।
ओं लक्ष्मी-गोधाङ्गुलित्राणाय नमः ।
ओं लक्ष्मी-सौवर्णकङ्कणाय नमः ।
ओं लक्ष्मी-विराजिताय नमः ।
ओं लक्ष्मी-विविधाभरणोज्ज्वलाय नमः ।
ओं ककारादि-क्षकारान्त-विद्याभूषण-भूषिताय नमः ।
ओं अकाराद्यक्षरस्फीताय नमः ।
ओं निःशेषस्वरमण्डिताय नमः ।
ओं वर्णमन्याय नमः ।
ओं महाविद्या-मातृकाक्षर-तत्त्ववते नमः । (340)
ओं लक्ष्मीकामेश्वराय नमः ।
ओं लक्ष्मीकामुकाय नमः ।
ओं निर्जरेश्वराय नमः ।
ओं कलावते नमः ।
ओं कीर्तिमते नमः ।
ओं कूताय नमः ।
ओं कुम्भाण्ड-प्राणहारकाय नमः ।
ओं केशान्तकाय नमः ।
ओं कालसुवे नमः ।
ओं कारकाय नमः । (350)
ओं कष्टहा कठ्याय नमः ।
ओं क्रीताय नमः ।
ओं कुब्जाय नमः ।
ओं कम्बुधराय नमः ।
ओं कलकण्ठाय नमः ।
ओं कुलालकाय नमः ।
ओं कुलाध्यक्षाय नमः ।
ओं कुलाचारिणे नमः ।
ओं कुलाकुलपदार्चिताय नमः ।
ओं करञ्जकाय नमः । (360)
ओं कर्तरीशाय नमः ।
ओं कनकाय नमः ।
ओं कर्तरीकराय नमः ।
ओं कलङ्करहिताय नमः ।
ओं कोकाय नमः ।
ओं कोकशोकनिवर्हणाय नमः ।
ओं कपिलाय नमः ।
ओं कलशिने नमः ।
ओं कोलाय नमः ।
ओं कालिकाय नमः । (370)
ओं कुलमानसाय नमः ।
ओं लक्ष्मीकुलाकुलाय नमः ।

ओं लक्ष्मीकुलजाय नमः ।
ओं कर्मवर्धनाय नमः ।
ओं लक्ष्मीकाशीश्वराय नमः ।
ओं लक्ष्मीनवनाथविनायकाय नमः ।
ओं लक्ष्मीकनिष्ठाय नमः ।
ओं निष्पिष्टाय नमः ।
ओं लक्ष्मी-योगीन्द्र-योगदाय नमः ।
ओं खपराय नमः । (380)
ओं खेचराय नमः ।
ओं खेटाय नमः ।
ओं खगगामिने नमः ।
ओं खलान्तकाय नमः ।
ओं खरूपाय नमः ।
ओं खगरूपाय नमः ।
ओं खनित्राय नमः ।
ओं खेटनायकाय नमः ।
ओं खगायुधाय नमः ।
ओं खण्डधारिणे नमः । (390)
ओं खञ्जनेक्षणभञ्जनाय नमः ।
ओं खरध्वंसिने नमः ।
ओं खरारावाय नमः ।
ओं खर्खुराकारभीषणाय नमः ।
ओं खङ्कटोलाय नमः ।
ओं खगगतिने नमः ।
ओं खेचरेश्वरसेविताय नमः ।
ओं खेचरीगणसेव्याय नमः ।
ओं खण्डमुद्रानियन्त्रिताय नमः ।
ओं खङ्गहस्ताय नमः । (400)
ओं खङ्गपालाय नमः ।
ओं खेताय नमः ।
ओं खवर्णभूषणाय नमः ।
ओं लक्ष्मीखेशाय नमः ।
ओं खोकरूपाय नमः ।
ओं लक्ष्मीभास्वरमूर्तिमते नमः ।
ओं लक्ष्मीखट्वाङ्गभृते नमः ।
ओं लक्ष्मीखेचराय नमः ।
ओं खाश्मलेपितः नमः ।
ओं लक्ष्मीचिताग्निनिलयाय नमः ।
(410)
ओं लक्ष्मीभस्मीकृतानलाय नमः ।
ओं लक्ष्मीभूतिप्रदाय नमः ।
ओं लक्ष्मीज्योतिष्मते नमः ।
ओं गाक्षराञ्चिताय नमः ।
ओं लक्ष्मीगीताय नमः ।
ओं स्वरालापिने नमः ।
ओं गोपतये नमः ।
ओं गोकुलेश्वराय नमः ।
ओं गङ्गाधरप्रियाय नमः ।

ओं गोष्ठिणे नमः । (420)
ओं गोपालाय नमः ।
ओं गन्धवर्धनाय नमः ।
ओं गन्धवाहप्रियाय नमः ।
ओं गीतगीतिज्ञाय नमः ।
ओं गीतलालसाय नमः ।
ओं गुञ्जाहारप्रियाय नमः ।
ओं गण्डिणे नमः ।
ओं गुरवे नमः ।
ओं गोवाहनाय नमः ।
ओं अगदाय नमः । (430)
ओं गाम्भीर्यवते नमः ।
ओं गुरुतराय नमः ।
ओं गुरुशब्दविवर्धनाय नमः ।
ओं गुरुभक्तिप्रियाय नमः ।
ओं गोलाय नमः ।
ओं गण्डशैलनिवासकाय नमः ।
ओं गर्जन्नादगोत्रपतये नमः ।
ओं गोलमार्गप्रियाय नमः ।
ओं अङ्गवते नमः ।
ओं निरङ्गाय नमः । (440)
ओं गजवक्रेशाय नमः ।
ओं गणनायकनायकाय नमः ।
ओं गन्धर्वनाथवरदाय नमः ।
ओं गगनेचरपूजिताय नमः ।
ओं गर्भहीनाय नमः ।
ओं गर्भवाहिने नमः ।
ओं गुणेग्गुणसागराय नमः ।
ओं गुणातीतवपुषे नमः ।
ओं गुण्याय नमः ।
ओं गुप्तमार्गप्रवर्तकाय नमः । (450)
ओं गुप्तमन्त्रप्रियाय नमः ।
ओं गोप्यगुह्याय नमः ।
ओं गुह्यकवल्लभाय नमः ।
ओं गोपीतात नमः ।
ओं गिरिनाथाय नमः ।
ओं गिरिधारिण नमः ।
ओं जगन्निधये नमः ।
ओं लक्ष्मीप्रियाय नमः ।
ओं प्रियः प्रीताय नमः ।
ओं लक्ष्मी-गरुडवाहनाय नमः ।
(460)
ओं लक्ष्मी-कपोतनिलयाय नमः ।
ओं लक्ष्मी-कल्पद्रुमाय नमः ।
ओं रवये नमः ।
ओं लक्ष्मीसन्तानकाय नमः ।
ओं साराय नमः ।
ओं लक्ष्मीसार-लतापतये नमः ।

ओं लक्ष्मीग्रह्याय नमः ।
ओं असुलक्ष्माय नमः ।
ओं लक्ष्मीसागरनन्दनाय नमः ।
ओं घृणिने नमः । (470)
ओं घृणिमयाय नमः ।
ओं घृष्टाय नमः ।
ओं घुसृणारक्ताय नमः ।
ओं ईश्वराय नमः ।
ओं घृणामयाय नमः ।
ओं अघहर्त्रे नमः ।
ओं घृणिनाथाय नमः ।
ओं घवर्णभाकाय नमः ।
ओं लक्ष्मीचिन्तामणये नमः ।
ओं साधुर्लक्ष्मीवीराय नमः । (480)
ओं वरोत्तमः ।
ओं लक्ष्मीचतुर्भुजाय नमः ।
ओं लक्ष्मीविश्वनाथाय नमः ।
ओं विनायकाय नमः ।
ओं ङवर्णाय नमः ।
ओं अनन्तरूपाय नमः ।
ओं जानुज्ञाय नमः ।
ओं ङोणरूपवते नमः ।
ओं ङवर्णरूपाय नमः ।
ओं विश्वेशाय नमः । (490)
ओं ङकाराक्षरमण्डनाय नमः ।
ओं लक्ष्मीसेव्याय नमः ।
ओं निर्गुणात्मने नमः ।
ओं लक्ष्मीशानाय नमः ।
ओं शिवार्चिताय नमः ।
ओं चारुरूपाय नमः ।
ओं चारुगतये नमः ।
ओं चारुमूर्तये नमः ।
ओं चमत्कृतिने नमः ।
ओं चारुनेत्राय नमः । (500)
ओं चारुमुखाय नमः ।
ओं चारुबाहवे नमः ।
ओं चतुर्भुजाय नमः ।
ओं चारुहस्ताय नमः ।
ओं चारुनखाय नमः ।
ओं चारुकेशाय नमः ।
ओं चामूपतये नमः ।
ओं चितावासिने नमः ।
ओं चराय नमः ।
ओं अचेलाय नमः । (510)
ओं चीनाम्बरधराय नमः ।
ओं अच्युताय नमः ।
ओं चारुहासाय नमः ।
ओं चारुदन्दाय नमः ।

ओं च्यवनाय नमः ।

ओं चन्द्रवासिताय नमः ।

ओं चन्द्राय नमः ।

ओं चन्द्रकलानाथाय नमः ।

ओं चारुपादाय नमः ।

ओं चतुर्गतये नमः । (520)

ओं चतुरात्मने नमः ।

ओं चतुर्थात्मने नमः ।

ओं चतुर्भूमिधराय नमः ।

ओं धराय नमः ।

ओं चतुःसमुद्रशयनाय नमः ।

ओं चतुस्सागरलङ्घनाय नमः ।

ओं चतुर्द्युतये नमः ।

ओं चतुःशय्याय नमः ।

ओं चतुर्वीरवराय नमः ।

ओं अवराय नमः । (530)

ओं चतुर्वेदमयाय नमः ।

ओं वैद्याय नमः ।

ओं चार्वङ्गाय नमः ।

ओं चारुभाषणाय नमः ।

ओं चतुर्वक्त्राय नमः ।

ओं चतुर्वक्त्रपूजिताय नमः ।

ओं परमेश्वराय नमः ।

ओं चलच्चन्द्रकशोभाढ्याय नमः ।

ओं चलन्नूपुरकूजिताय नमः ।

ओं चलदम्भोदसद्दशाय नमः । (540)

ओं चलदम्भोजलोचनाय नमः ।

ओं चलदम्भोदवदनाय नमः ।

ओं चलदम्भोदशोभिताय नमः ।

ओं चलत्कनककेयूराय नमः ।

ओं चलत्काञ्चनकुण्डलाय नमः ।

ओं चलत्कनकशृङ्गाभाय नमः ।

ओं चलत्कनकशेखराय नमः ।

ओं चकाररूपाय नमः ।

ओं चारेशाय नमः ।

ओं चकारार्णविभूषिताय नमः । (550)

ओं लक्ष्मीशान्ताय नमः ।

ओं महादक्षाय नमः ॥

ओं लक्ष्मीपीताम्बराय नमः ।

ओं पवये नमः ।

ओं छत्राय नमः ।

ओं छत्रधराय नमः ।

ओं छान्ताय नमः ।

ओं छिन्नमस्ताप्रियाय नमः

ओं पित्रे नमः ।

ओं छन्नच्छेदिने नमः । (560)

ओं छिन्नमुखाय नमः ।

ओं छकाराक्षररूपवते नमः ।

ओं लक्ष्मीकान्ताय नमः ।
ओं कान्तियुक्ताय नमः ।
ओं लक्ष्मीसाधक ईश्वरः ।
ओं जगन्नाथाय नमः ।
ओं जगद्भर्त्रे नमः ।
ओं जगत्कर्त्रे नमः ।
ओं जगत्स्थिताय नमः ।
ओं जगत्क्षयकराय नमः । (570)
ओं जेत्रे नमः ।
ओं जगतांपतिरुत्तमाय नमः ।
ओं जगत्स्वामिने नमः ।
ओं जगद्धात्रे नमः ।
ओं जगत्संहारकारकाय नमः ।
ओं जीवात्मने नमः ।
ओं परमात्मने नमः ।
ओं जगद्भूतिप्रदाय नमः ।
ओं भवाय नमः ।
ओं जगद्गुणिने नमः । (580)
ओं जगत्स्तुत्याय नमः ।
ओं जगदानन्ददायकाय नमः ।
ओं जगत्सन्तोषभूतात्मने नमः ।
ओं जगत्क्रोधदयान्विताय नमः ।
ओं जगद्दीप्तिकराय नमः ।
ओं वेदोपासिताय नमः ।

ओं जगदीश्वराय नमः ।
ओं जविने नमः ।
ओं जवान्वितजाराय नमः ।
ओं जगदाडम्बरप्रदाय नमः । (590)
ओं जगत्सेव्याय नमः ।
ओं जगत्प्रीताय नमः ।
ओं जगदिष्टाय नमः ।
ओं जगन्मयाय नमः ।
ओं जृम्भणाय नमः ।
ओं जटिलाय नमः ।
ओं जीवाय नमः ।
ओं जम्भारातिवरप्रदाय नमः ।
ओं जामाताय नमः ।
ओं जलधाय नमः । (600)
ओं जान्ताय नमः ।
ओं जटामुकुटमण्डिताय नमः ।
ओं जितारिणे नमः ।
ओं ययदाय नमः ।
ओं अजेयाय नमः ।
ओं जयकृद्वीरतापनाय नमः ।
ओं लक्ष्मीकुचतटासीनाय नमः ।
ओं लक्ष्मीनयनगोचराय नमः ।
ओं झल्लरीझोत्कृताय नमः ।
ओं झाडिने नमः । (610)

ओं झण्डिने नमः ।
ओं झण्ठप्रतापनाय नमः ।
ओं झाङ्कारिने नमः ।
ओं झङ्कृतये नमः ।
ओं झिल्लीरवाय नमः ।
ओं झाङ्कारिनूपुराय नमः ।
ओं लक्ष्मीवराय नमः ।
ओं महालक्ष्मीसेविताय नमः ।
ओं देववन्दिताय नमः ।
ओं ञकाराय नमः । (620)
ओं ञारलाय नमः ।
ओं ञेशाय नमः ।
ओं ञवर्णामृतरूपवते नमः ।
ओं लक्ष्मीस्वभवे नमः ।
ओं स्वर्गपतये नमः ।
ओं लक्ष्मीवन्द्याय नमः ।
ओं विधुन्तुदाय नमः ।
ओं टकाराय नमः ।
ओं टङ्कहस्ताय नमः ।
ओं टान्तष्टाय नमः । (630)
ओं ईंकारकूजिताय नमः ।
ओं लक्ष्मीदेवाय नमः ।
ओं देवदेवाय नमः ।
ओं लक्ष्मीदान्ताय नमः ।

ओं कृपानिधये नमः ।
ओं ठकुराय नमः ।
ओं ठालकाय नमः ।
ओं ठास्याय नमः ।
ओं ठवर्णसुषमानिधये नमः ।
ओं लक्ष्मीविधे नमः । (640)
ओं वितर्काख्याय नमः ।
ओं वैनतेयध्वजाय नमः ।
ओं ध्वजाय नमः ।
ओं डमरुडामरेशानाय नमः
ओं डकाराक्षरसंयुताय नमः ।
ओं लक्ष्मीपतये नमः ।
ओं पावराङ्गाय नमः ।
ओं लक्ष्मीनायकनायकाय नमः ।
ओं डकारवाकाय नमः ।
ओं ढक्कभेद्याय नमः । (650)
ओं ढक्कासुरनिसूदनाय नमः ।
ओं लक्ष्मीजेत्रे नमः ।
ओं जयकराय नमः ।
ओं लक्ष्मीशाय नमः ।
ओं लम्बमूर्धजाय नमः ।
ओं लक्ष्मीजगत्स्थिताय नमः ।
ओं लक्ष्मीशौरये नमः ।
ओं लक्ष्मीगदाधराय नमः ।

ओं णान्ताय नमः ।
ओं णवर्णकाय नमः । (660)
ओं णेशाय नमः ।
ओं णवर्णामृतसाधिताय नमः ।
ओं लक्ष्मीदामोदराय नमः ।
ओं लक्ष्मीप्राणाय नमः ।
ओं लक्ष्मीरथाङ्गभृते नमः ।
ओं तुल्याय नमः ।
ओं अतुल्याय नमः ।
ओं महातुल्यचित्ताय नमः ।
ओं तारार्णमण्डिताय नमः ।
ओं तोतुलाय नमः । (670)
ओं तुलसीनाथाय नमः ।
ओं तन्त्रज्ञमन्त्रनायकाय नमः ।
ओं तपःफलप्रदाय नमः ।
ओं ताम्ररूपाय नमः ।
ओं अतुलपराक्रमाय नमः ।
ओं तुटिरूपाय नमः ।
ओं तुटिगतये नमः ।
ओं तपस्विने नमः ।
ओं तापसप्रियाय नमः ।
ओं तुहिनांशवे नमः । (680)
ओं तुहिनजाय नमः ।
ओं तुषारकरशोभिताय नमः ।
ओं तुरीसेव्याय नमः ।
ओं तुलाभाय नमः ।
ओं तकाराक्षरमण्डनाय नमः ।
ओं लक्ष्मीशङ्खायुधाय नमः ।
ओं लक्ष्मीनन्दकेशाय नमः ।
ओं स्ववर्णभृते नमः ।
ओं स्थविराय नमः ।
ओं स्थूलगात्राय नमः । (690)
ओं स्थाणुसेव्याय नमः ।
ओं स्थशब्दकृते नमः ।
ओं स्थालीरसप्रियाय नमः ।
ओं स्थूलाय नमः ।
ओं स्थकारेश्वर ईश्वराय नमः ।
ओं लक्ष्मीजीवेश्वराय नमः ।
ओं लक्ष्मीधराय नमः ।
ओं लक्ष्मीनृसिंहाय नमः ।
ओं दयावते नमः ।
ओं द्युपतिदक्षाय नमः । (700)
ओं द्यूताय नमः ।
ओं दम्भविवर्जिताय नमः ।
ओं दारिद्र्यहाय नमः ।
ओं दुःखहर्त्रे नमः ।
ओं दौर्भाग्यक्षयकृते नमः ।
ओं दयिने नमः ।

ओं दीनादीनप्रभवे नमः ।
ओं दम्भिने नमः ।
ओं दयितोदयवाञ्छकाय नमः ।
ओं दानकृते नमः । (710)
ओं दातृफलदाय नमः ।
ओं दनुजेन्द्रक्षयङ्कराय नमः ।
ओं दैत्यहाय नमः ।
ओं दैत्यदर्पघ्नाय नमः ।
ओं दर्पवादिक्षयङ्कराय नमः ।
ओं दारप्रियाय नमः ।
ओं दीर्घनखाय नमः ।
ओं दुष्टासुरनिसूदनाय नमः ।
ओं देवदेवाय नमः ।
ओं यशोवन्द्याय नमः । (720)
ओं दकाराक्षरमण्डिताय नमः ।
ओं लक्ष्मीदयाकराय नमः ।
ओं लक्ष्मीदेवाय नमः ।
ओं लक्ष्मीदयानिधये नमः ।
ओं धनदाय नमः ।
ओं धनकृते नमः ।
ओं धन्याय नमः ।
ओं धनदेशाय नमः ।
ओं धनप्रदाय नमः ।
ओं धृतिमते नमः । (730)
ओं धर्मवते नमः ।
ओं धर्मिणे नमः ।
ओं धर्मकर्मविचक्षणाय नमः ।
ओं धर्माध्यक्षाय नमः ।
ओं धनाध्यक्षाय नमः ।
ओं धवलाय नमः ।
ओं धैर्यवते नमः ।
ओं धनिने नमः ।
ओं धीराय नमः ।
ओं धैर्यकराय नमः । (740)
ओं धर्मदक्षाय नमः ।
ओं धनदपूजिताय नमः ।
ओं लक्ष्मीधनिने नमः ।
ओं महालक्ष्मीधवाय नमः ।
ओं लक्ष्मीमनोभवाय नमः ।
ओं नवीनाय नमः ।
ओं नूतनाय नमः ।
ओं नम्राय नमः ।
ओं नटनाय नमः ।
ओं नाट्यतोषिताय नमः । (750)
ओं नगाय नमः ।
ओं नागनगश्रेष्ठाय नमः ।
ओं नृगम्याय नमः ।
ओं नागमण्डनाय नमः ।

ओं नृसिंहनृवराय नमः ।
ओं अनन्ताय नमः ।
ओं नरनारायणाय नमः ।
ओं नवाय नमः ।
ओं नागराजाय नमः ।
ओं नागपतये नमः । (760)
ओं नागान्तकध्वजाय नमः ।
ओं अनलाय नमः ।
ओं नगारूढाय नमः ।
ओं निम्ननाभिने नमः ।
ओं नन्दिसेव्य नटेश्वराय नमः ।
ओं नलिनाक्षाय नमः ।
ओं नृवन्द्याय नमः ।
ओं नायकाय नमः ।
ओं नागनायकाय नमः ।
ओं नर्मदातीरक्रीडाकृते नमः । (770)
ओं नलिनीपतिलोचनाय नमः ।
ओं नरेशनृपपूज्याय नमः ।
ओं नागशायिने नमः ।
ओं नगोत्तमाय नमः ।
ओं नारायणाय नमः ।
ओं निष्कलङ्काय नमः ।
ओं नवर्णाकृतिरात्मवते नमः ।
ओं लक्ष्मीनागाय नमः ।
ओं नगधराय नमः ।
ओं लक्ष्मीनाथाय नमः । (780)
ओं नरूपवते नमः ।
ओं पुष्पप्रियाय नमः ।
ओं पुष्पशय्याशयानाय नमः ।
ओं पुष्पशेखराय नमः ।
ओं पुष्पधन्वाय नमः ।
ओं प्रद्युम्नाय नमः ।
ओं पुष्पेषुपुष्पपूजिताय नमः ।
ओं पूज्याय नमः ।
ओं पवित्रपरमाय नमः ।
ओं परमेष्ठिने नमः । (790)
ओं पितामहाय नमः ।
ओं परंपदाय नमः ।
ओं परंपुण्याय नमः ।
ओं परमायुषे नमः ।
ओं परात्पराय नमः ।
ओं पारावारसुताभर्त्रे नमः ।
ओं परमेशाय नमः ।
ओं परं महते नमः ।
ओं पुण्यदाय नमः ।
ओं पुण्यकृत् पूताय नमः । (800)
ओं पुराणागमपूजिताय नमः ।
ओं पुराणपुरुषाय नमः ।

ओं पीनाय नमः ।
ओं पीनवक्षाय नमः ।
ओं जितेन्द्रियाय नमः ।
ओं पीतवासाय नमः ।
ओं पीतमालाय नमः ।
ओं पीतवर्णाय नमः ।
ओं पराङ्कुशाय नमः ।
ओं पत्रगाय नमः । (810)
ओं विश्रुताय नमः ।
ओं पान्थाय नमः ।
ओं पथिकाय नमः ।
ओं पान्थतोषदाय नमः ।
ओं पूर्वाय नमः ।
ओं पौरजनस्तुत्याय नमः ।
ओं पवर्णाक्षरमण्डनाय नमः ।
ओं लक्ष्मीपीताम्बराय नमः ।
ओं लक्ष्मीपीताय नमः ।
ओं लक्ष्मीपराय नमः । (820)
ओं परमफलाय नमः ।
ओं फणिवराय नमः ।
ओं स्फीतः फलकृते नमः ।
ओं फलदाय नमः ।
ओं फणिने नमः ।
ओं फणिशय्याशयानाय नमः ।
ओं फकारामृतमण्डनाय नमः ।
ओं बालकाय नमः ।
ओं बुद्धिमते नमः ।
ओं बौद्धाय नमः । (830)
ओं बन्धवे नमः ।
ओं बान्धवेश्वराय नमः ।
ओं लक्ष्मीबन्धवे नमः ।
ओं महालक्ष्मीबान्धवाय नमः ।
ओं लक्षणान्विताय नमः ।
ओं भद्रपदाय नमः ।
ओं भास्वराङ्गाय नमः ।
ओं भास्कराय नमः ।
ओं भानुरव्ययाय नमः ।
ओं भानिधिर्भगवते नमः । (840)
ओं भीताय नमः ।
ओं भीतिहाय नमः ।
ओं अभयदायकाय नमः ।
ओं लक्ष्मीभयहराय नमः ।
ओं लक्ष्मीभयदाय नमः ।
ओं भयघातनाय नमः ।
ओं महेश्वराय नमः ।
ओं महामान्याय नमः ।
ओं महामात्याय नमः ।
ओं मनोरमाय नमः । (850)

ओं मनोहारिणे नमः ।
ओं महाशान्ताय नमः ।
ओं महातेजाय नमः ।
ओं मनोजवाय नमः ।
ओं महोत्साहिणे नमः ।
ओं माधवाय नमः ।
ओं मायाधारिणे नमः ।
ओं मनोन्मनाय नमः ।
ओं मानदाय नमः ।
ओं मुरघातिने नमः । (860)
ओं मानवेष्टफलप्रदाय नमः ।
ओं मदिरामोदमुदिताय नमः ।
ओं मारमोहविवर्जिताय नमः ।
ओं लक्ष्मीमहोदयाय नमः ।
ओं लक्ष्मीमान्याय नमः ।
ओं लक्ष्मीमदालसाय नमः ।
ओं यशोदानन्दनाय नमः ।
ओं यान्ताय नमः ।
ओं यशस्वी योधसैनिकाय नमः ।
ओं यशोधराय नमः । (870)
ओं यमयोगिने नमः ।
ओं योगिनां योगदायकाय नमः ।
ओं योगेन्द्राय नमः ।
ओं यागपूज्याय नमः ।

ओं यादवाय नमः ।
ओं यादवेश्वराय नमः ।
ओं यज्ञप्रीताय नमः ।
ओं यज्ञनिधये नमः ।
ओं याजकाय नमः ।
ओं याज्ञिकप्रियाय नमः । (880)
ओं यज्वाय नमः ।
ओं यज्ञाय नमः ।
ओं यशोजाताय नमः ।
ओं यकाराक्षररूपवते नमः ।
ओं लक्ष्मीयज्ञकराय नमः ।
ओं लक्ष्मीयाज्ञिकाय नमः ।
ओं यज्ञसेविताय नमः ।
ओं राजाय नमः ।
ओं रमापतिर्देवाय नमः ।
ओं रामराजाय नमः । (890)
ओं अजोरजाय नमः ।
ओं राजसाय नमः ।
ओं रात्रिकृते नमः ।
ओं रामाय नमः ।
ओं रामानन्दप्रदायकाय नमः ।
ओं रेवतीरमणाय नमः ।
ओं राकापतये नमः ।
ओं सर्वकलाधराय नमः ।

ओं लक्ष्मीरामाय नमः ।
ओं महालक्ष्मीराजाय नमः । (900)
ओं लक्ष्मीत्रिविक्रमाय नमः ।
ओं लाक्षारुणाय नमः ।
ओं लीतराक्षाय नमः ।
ओं ललज्जिह्वाय नमः ।
ओं लतापतये नमः ।
ओं लङ्केशाय नमः ।
ओं लासिकाय नमः ।
ओं लान्ताय नमः ।
ओं लम्बोदरप्रियपराय नमः ।
ओं लक्ष्मीलीनाय नमः । (910)
ओं अलिवर्णाय नमः ।
ओं लकाराकार ईश्वराय नमः ।
ओं वान्तदाय नमः ।
ओं वारसेनानिने नमः ।
ओं वराहाय नमः ।
ओं विग्रहिणे नमः ।
ओं विराजे नमः ।
ओं विष्णवे नमः ।
ओं वसुन्धरानाथाय नमः ।
ओं वसुदाय नमः । (920)
ओं वसुधाधिपाय नमः ।
ओं वागीश्वराय नमः ।

ओं वेणुहस्ताय नमः ।
ओं वेतालाय नमः ।
ओं विरसे नमः ।
ओं वियते नमः ।
ओं विद्वते नमः ।
ओं विशालनयनाय नमः ।
ओं विकाराय नमः ।
ओं विकृतये नमः । (930)
ओं पुम्रे नमः ।
ओं वितर्किने नमः ।
ओं विनयिने नमः ।
ओं विद्याराजमान्याय नमः ।
ओं विचारकाय नमः ।
ओं वाग्मिने नमः ।
ओं वानीरमूलस्थाय नमः ।
ओं वाचाटाय नमः ।
ओं वीरनायकाय नमः ।
ओं लक्ष्मीवराहाय नमः । (940)
ओं वीरेशाय नमः ।
ओं लक्ष्मीवीराय नमः ।
ओं वनेचराय नमः ।
ओं शङ्कराय नमः ।
ओं श्रीधराय नमः ।
ओं श्रीलाय नमः ।

ओं श्रमिने नमः ।
ओं शीतांशुशीतलाय नमः ।
ओं शशिमौलिने नमः ।
ओं शरन्नागाय नमः । (950)
ओं शम्भवे नमः ।
ओं शङ्खनिसूदनाय नमः ।
ओं शक्राय नमः ।
ओं शत्रुक्षयकराय नमः ।
ओं शत्रुकालकराय नमः ।
ओं लक्ष्मीशिवाय नमः ।
ओं लक्ष्मीशिवः नमः ।
ओं श्रीपतये नमः ।
ओं श्रीवराय नमः ।
ओं लक्ष्मीशिवप्रदाय नमः । (960)
ओं षोडशस्वररूपाय नमः ।
ओं षोडशार्णविभूषणाय नमः ।
ओं षडङ्गविद्यावेत्ताय नमः ।
ओं षकाराक्षरभूषिताय नमः ।
ओं लक्ष्मीषडङ्गधारिणे नमः ।
ओं लक्ष्मीषोडशवर्णभृते नमः ।
ओं सुन्दराय नमः ।
ओं स्वर्गवसतये नमः ।
ओं सर्वेशः सर्वतोमुखाय नमः ।
ओं सप्तसप्तिताय नमः । (970)
ओं सदाचाराय नमः ।
ओं साधुसाधुजनप्रियाय नमः ।
ओं सरसाय नमः ।
ओं सरलाय नमः ।
ओं साराय नमः ।
ओं सुखिने नमः ।
ओं सुखविवर्धनाय नमः ।
ओं सप्तद्वीपवतीनाथाय नमः ।
ओं सप्तसागरनायकाय नमः ।
ओं सप्तस्वरमयाय नमः । (980)
ओं सप्तपातालतलवासकाय नमः ।
ओं सात्त्विकाय नमः ।
ओं सत्त्वसंपन्नाय नमः ।
ओं समस्तदुरितापहाय नमः ।
ओं समस्तरिपुविध्वंसिने नमः ।
ओं समस्तासुरघातनाय नमः ।
ओं समस्तपातकध्वंसिने नमः ।
ओं समस्तसुरवन्दिताय नमः ।
ओं लक्ष्मीसनातनाय नमः ।
ओं लक्ष्मीसनकाय नमः । (990)
ओं साधुपूजिताय नमः ।
ओं हरिणे नमः ।
ओं हराय नमः ।
ओं हरिहराय नमः ।

ओं हाटकेशाय नमः ।
ओं हटापहाय नमः ।
ओं हरिद्रवर्णाय नमः ।
ओं हसिताय नमः ।
ओं हारिणे नमः ।
ओं हरितलोचनाय नमः । (1000)
ओं लक्ष्मीहरिणे नमः ।
ओं हृषीकेशाय नमः ।
ओं लक्ष्मीहारधर नमः ।
ओं अनघाय नमः ।
ओं क्षमिणे नमः ।
ओं क्षमापतये नमः ।
ओं क्षत्ताय नमः ।
ओं क्षमेशाय नमः ।
ओं क्षवर्णभाकिने ।
ओं क्षणकृते नमः । (1010)
ओं क्षणदानाथाय नमः ।
ओं क्षमावते नमः ।
ओं क्षुभितासुराय नमः ।
ओं लक्ष्मीक्षमायुताय नमः ।
ओं लक्ष्मीक्षत्ताय नमः ।
ओं लक्ष्मीक्षवर्णभृते नमः ।
ओं अनन्ताय नमः ।
ओं अनन्तपूज्याय नमः ।
ओं आदिरादित्यसन्निभाय नमः ।
ओं इन्दिरावल्लभाय नमः । (1020)
ओं देवाय नमः ।
ओं ईश्वराय नमः ।
ओं उग्ररूपवते नमः ।
ओं ऊष्मोज्ज्वलाय नमः ।
ओं ऋणहाय नमः ।
ओं ॠकारोज्ज्वलमातृकाय नमः ।
ओं ऌवर्णवर्णाय नमः ।
ओं ॡकाराय नमः ।
ओं एनवर्णसमन्विताय नमः ।
ओं ऐश्वर्यसहितश्चोष्ठाय नमः । (1030)
ओं उन्मत्तस्वरार्चिताय नमः ।
ओं अंकाराय नमः ।
ओं मः कारस्वरूपाय नमः ।
ओं स्वरभूषिताय नमः।
ओं ह्रीं ह्सौः ह्रीं श्रीं देवाय
लक्ष्मीनारायणाय शिवाय नमः ।
(1035)

॥ इति श्रीलक्ष्मीनारायण सहस्रनामावलिः सम्पूर्णम् ॥

# श्रीलक्ष्मीनारायण अष्टोत्तरशतनाम स्तोत्रम्

ॐ श्रीर्विष्णुः कमला शार्ङ्गी लक्ष्मीर्वैकुण्ठनायकः ।
पद्मालया चतुर्बाहुः क्षीराब्धितनयाऽच्युतः ॥ 1 ॥

इन्दिरा पुण्डरीकाक्षा रमा गरुडवाहनः ।
भार्गवी शेषपर्यङ्को विशालाक्षी जनार्दनः ॥ 2 ॥

स्वर्णाङ्गी वरदो देवी हरिरिन्दुमुखी प्रभुः ।
सुन्दरी नरकध्वंसी लोकमाता मुरान्तकः ॥ 3 ॥

भक्तप्रिया दानवारिः अम्बिका मधुसूदनः ।
वैष्णवी देवकीपुत्रो रुक्मिणी केशिमर्दनः ॥ 4 ॥

वरलक्ष्मी जगन्नाथः कीरवाणी हलायुधः ।
नित्या सत्यव्रतो गौरी शौरिः कान्ता सुरेश्वरः ॥ 5 ॥

नारायणी हृषीकेशः पद्महस्ता त्रिविक्रमः ।
माधवी पद्मनाभश्च स्वर्णवर्णा निरीश्वरः ॥ 6 ॥

सती पीताम्बरः शान्ता वनमाली क्षमाऽनघः ।
जयप्रदा बलिध्वंसी वसुधा पुरुषोत्तमः ॥ 7 ॥

राज्यप्रदाऽखिलाधारो माया कंसविदारणः ।
महेश्वरी महादेवो परमा पुण्यविग्रहः ॥ 8 ॥

रमा मुकुन्दः सुमुखी मुचुकुन्दवरप्रदः ।
वेदवेद्याऽब्धिजामाता सुरूपाऽर्केन्दुलोचनः ॥ 9 ॥

पुण्याङ्गना पुण्यपादो पावनी पुण्यकीर्तनः ।
विश्वप्रिया विश्वनाथो वाग्रूपी वासवानुजः ॥ 10 ॥

सरस्वती स्वर्णगर्भो गायत्री गोपिकाप्रियः ।
यज्ञरूपा यज्ञभोक्ता भक्ताभीष्टप्रदा गुरुः ॥ 11 ॥

स्तोत्रक्रिया स्तोत्रकारः सुकुमारी सवर्णकः ।
मानिनी मन्दरधरो सावित्री जन्मवर्जितः ॥ 12 ॥

मन्त्रगोप्त्री महेष्वासो योगिनी योगवल्लभः ।
जयप्रदा जयकरः रक्षित्री सर्वरक्षकः ॥ 13 ॥

अष्टोत्तरशतं नाम्नां लक्ष्म्या नारायणस्य च ।
यः पठेत् प्रातरुत्थाय सर्वदा विजयी भवेत् ॥ 14 ॥

॥ इति श्री लक्ष्मीनारायण अष्टोत्तरशतनाम स्तोत्रं संपूर्णम् ।

# श्रीलक्ष्मीनारायण अष्टोत्तरशत नामावलिः

ओं श्रियै नमः ।

ओं विष्णवे नमः ।

ओं कमलायै नमः ।

ओं शार्ङ्गिने नमः ।

ओं लक्ष्म्यै नमः ।

ओं वैकुण्ठनायकाय नमः ।

ओं पद्मालयायै नमः ।

ओं चतुर्बाहवे नमः ।

ओं क्षीराब्धितनयायै नमः ।

ओं अच्युताय नमः । (10)

ओं इन्दिरायै नमः ।

ओं पुण्डरीकाक्षाय नमः ।

ओं रमायै नमः ।

ओं गरुडवाहनाय नमः ।

ओं भार्गव्यै नमः ।

ओं शेषपर्यङ्काय नमः ।

ओं विशालाक्ष्यै नमः ।

ओं जनार्दनाय नमः ।

ओं स्वर्णाङ्ग्यै नमः ।

ओं वरदाय नमः । (20)

ओं देव्यै नमः ।

ओं हरिणे नमः ।

ओं इन्दुमुख्यै नमः ।

ओं प्रभवे नमः ।

ओं सुन्दर्यै नमः ।

ओं नरकध्वंसिने नमः ।

ओं लोकमात्रे नमः ।

ओं मुरान्तकाय नमः ।

ओं भक्तप्रियायै नमः ।

ओं दानवारिणे नमः । (30)

ओं अम्बिकायै नमः ।

ओं मधुसूदनाय नमः ।

ओं वैष्णव्यै नमः ।

ओं देवकीपुत्राय नमः ।

ओं रुक्मिण्यै नमः ।

ओं केशिमर्दनाय नमः ।

ओं वरलक्ष्म्यै नमः ।

ओं जगन्नाथाय नमः ।

ओं कीरवाण्यै नमः ।

ओं हलायुधाय नमः । (40)

ओं नित्यायै नमः ।

ओं सत्यव्रताय नमः ।

ओं गौर्यै नमः ।

ओं शौरिणे नमः ।

ओं कान्तायै नमः ।

ओं सुरेश्वराय नमः ।

ओं नारायण्यै नमः ।

ओं हृषिकेशाय नमः ।

ओं पद्महस्तायै नमः ।

ओं त्रिविक्रमाय नमः । (50)

ओं माधव्यै नमः ।

ओं पद्मानाभाय नमः ।

ओं स्वर्णवर्णायै नमः ।

ओं निरीश्वराय नमः ।

ओं सत्यै नमः ।

ओं पीताम्बराय नमः ।

ओं शान्तायै नमः ।

ओं वनमालिने नमः ।

ओं क्षमायै नमः ।

ओं अनघाय नमः । (60)

ओं जयप्रदायै नमः ।

ओं बलिध्वंसिने नमः ।

ओं वसुधायै नमः ।

ओं पुरुषोत्तमाय नमः ।
ओं राज्यप्रदायै नमः ।
ओं अखिलाधाराय नमः ।
ओं मायायै नमः ।
ओं कंसाविदारणाय नमः ।
ओं महेश्वर्यै नमः ।
ओं महादेवाय नमः । (70)

ओं परमायै नमः ।
ओं पुण्यविग्रहाय नमः ।
ओं रमायै नमः ।
ओं मुकुन्दाय नमः ।
ओं सुमुख्यै नमः ।
ओं मुचुकुन्दवरप्रदाय नमः ।
ओं वेदवेद्यायै नमः ।
ओं अब्धिजामात्रे नमः ।
ओं सुरूपायै नमः ।
ओं अर्केन्दुलोचनाय नमः । (80)

ओं पुण्याङ्गनायै नमः ।
ओं पुण्यपादाय नमः ।
ओं पावन्यै नमः ।
ओं पुण्यकीर्तनाय नमः ।
ओं विश्वप्रियायै नमः ।

ओं विश्वनाथाय नमः ।

ओं वाग्रूपायै नमः ।

ओं वासनानुजाय नमः ।

ओं सरस्वत्यै नमः ।

ओं स्वर्णगर्भाय नमः । (90)

ओं गायत्र्यै नमः ।

ओं गोपिकाप्रियाय नमः ।

ओं यज्ञरूपायै नमः ।

ओं यज्ञभोक्त्रे नमः ।

ओं भक्ताभीष्टप्रदायै नमः ।

ओं गुरवे नमः ।

ओं स्तोत्रक्रियायै नमः ।

ओं स्तोत्रकाराय नमः ।

ओं सुकुमार्यै नमः ।

ओं सवर्णकाय नमः । (100)

ओं मानिन्यै नमः ।

ओं मन्दरधराय नमः ।

ओं सावित्र्यै नमः ।

ओं जन्मवर्जिताय नमः ।

ओं मन्त्रगोप्त्र्यै नमः ।

ओं महेष्वासाय नमः ।

ओं योगिन्यै नमः ।

ओं योगवल्लभाय नमः ।

ओं जयप्रदायै नमः ।

ओं जयकराय नमः ।

ओं रक्षित्र्यै नमः ।

ओं सर्वरक्षकाय नमः । (112)

॥ इति श्रीलक्ष्मीनारायण अष्टोत्तरशत नामावलिः सम्पूर्णम् ॥

# श्रीलक्ष्मीनारायण अष्टकम्

आर्तानां दुःखशमने दीक्षितं प्रभुमव्ययम् ।
अशेषजगदाधारं लक्ष्मीनारायणं भजे ॥ 1 ॥

अपारकरुणाम्भोधिं आपद्बान्धवमच्युतम् ।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे ॥ 2 ॥

भक्तानां वत्सलं भक्तिगम्यं सर्वगुणाकरम् ।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे ॥ 3 ॥

सुहृदं सर्वभूतानां सर्वलक्षणसम्युतम् ।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे ॥ 4 ॥

चिदचित्सर्वजन्तूनां आधारं वरदं परम् ।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे ॥ 5 ॥

शङ्खचक्रधरं देवं लोकनाथं दयानिधिम् ।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे ॥ 6 ॥

पीताम्बरधरं विष्णुं विलसत्सूत्रशोभितम् ।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे ॥ 7 ॥

हस्तेन दक्षिणेन यजं अभयप्रदमक्षरम् ।
अशेषदुःखशान्त्यर्थं लक्ष्मीनारायणं भजे ॥ 8 ॥

यः पठेत् प्रातरुत्थाय लक्ष्मीनारायणाष्टकम् ।
विमुक्तस्सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥ 9 ॥

॥ इति श्री लक्ष्मीनारायणाष्टकम् संपूर्णम् ॥

पूर्ण आनन्द लहरि

# श्रीविष्णुः अष्टोत्तरशत दिव्यस्थानीयनाम स्तोत्रम्

अष्टोत्तरशत स्थानेष्वाविर्भूतं जगत्पतिम् ।
नमामि जगतामीशं नारायणमनन्यधीः ॥ 1 ॥

ओं श्रीवैकुण्ठे वासुदेवमामोदे कर्षणाह्वयम् ।
प्रद्युम्नं च प्रमोदाख्ये सम्मोदे चानिरुद्धकम् ॥ 2 ॥

सत्यलोके तथा विष्णुं पद्माक्षं सूर्यमण्डले ।
क्षीराब्धौ शेषशयनं श्वेतद्वीपेतु तारकम् ॥ 3 ॥

नारायणं बदर्याख्ये नैमिषे हरिमव्ययम् ।
शालग्रामं हरिक्षेत्रे अयोध्यायां रघूत्तमम् ॥ 4 ॥

मथुरायां बालकृष्णं मायायां मधुसूदनम् ।
काश्यां तु भोगशयनमवन्त्यामवनीपतिम् ॥ 5 ॥

द्वारवत्यां यादवेन्द्रं व्रजे गोपीजनप्रियम् ।
वृन्दावने नन्दसूनुं गोविन्दं कालियह्रदे ॥ 6 ॥

गोवर्धने गोपवेषं भवघ्नं भक्तवत्सलम् ।
गोमन्तपर्वते शौरिं हरिद्वारे जगत्पतिम् ॥ 7 ॥

प्रयागे माधवं चैव गयायां तु गदाधरम् ।
गङ्गासागरगे विष्णुं चित्रकूटे तु राघवम् ॥ 8 ॥

नन्दिग्रामे राक्षसघ्नं प्रभासे विश्वरूपिणम् ।
श्रीकूर्मे कूर्ममचलं नीलाद्रौ पुरुषोत्तमम् ॥ 9 ॥

सिंहाचले महासिंहं गदिनं तुलसीवने ।
घृतशैले पापहरं श्वेताद्रौ सिंहरूपिणम् ॥ 10 ॥

योगानन्दं धर्मपुर्यां काकुले त्वान्ध्रनायकम् ।
अहोबिले गारुडाद्रौ हिरण्यासुरमर्दनम् ॥ 11 ॥

विठ्ठलं पाण्डुरङ्गे तु वेङ्कटाद्रौ रमासखम् ।
नारायणं यादवाद्रौ नृसिंहं घटिकाचले ॥ 12 ॥

वरदं वारणगिरौ काञ्च्यां कमललोचनम् ।
यथोक्तकारिणं चैव परमेशपुराश्रयम् ॥ 13 ॥

पाण्डवानां तथा दूतं त्रिविक्रममथोन्नतम् ।
कामासिक्यां नृसिंहं च तथाष्टभुजसञ्ज्ञकम् ॥ 14 ॥

मेघाकारं शुभाकारं शेषाकारं तु शोभनम् ।
अन्तरा शितिकण्ठस्य कामकोट्यां शुभप्रदम् ॥ 15 ॥

कालमेघं खगारूढं कोटिसूर्यसमप्रभम् ।
दिव्यं दीपप्रकाशं च देवानामधिपं मुने ॥ 16 ॥

प्रवालवर्णं दीपाभं काञ्च्यामष्टादशस्थितम् ।
श्रीगृध्रसरसस्तीरे भान्तं विजयराघवम् ॥ 17 ॥

वीक्षारण्ये महापुण्ये शयानं वीरराघवम् ।
तोताद्रौ तुङ्गशयनं गजार्तिघ्नं गजस्थले ॥ 18 ॥

महाबलं बलिपुरे भक्तिसारे जगत्पतिम् ।
महावराहं श्रीमुष्णे महीन्द्रे पद्मलोचनम् ॥ 19 ॥

श्रीरङ्गे तु जगन्नाथं श्रीधामे जानकीप्रियम् ।
सारक्षेत्रे सारनाथं खण्डने हरचापहम् ॥ 20 ॥

श्रीनिवासस्थले पूर्णं सुवर्णं स्वर्णमन्दिरे ।
व्याघ्रपुर्यां महाविष्णुं भक्तिस्थाने तु भक्तिदम् ॥ 21 ॥

श्वेतह्रदे शान्तमूर्तिमग्निपुर्यां सुरप्रियम् ।
भर्गाख्यं भार्गवस्थाने वैकुण्ठाख्ये तु माधवम् ॥ 22 ॥

पुरुषोत्तमे भक्तसखं चक्रतीर्थे सुदर्शनम् ।
कुम्भकोणे चक्रपाणिं भूतस्थाने तु शार्ङ्गिणम् ॥ 23 ॥

कपिस्थले गजार्तिघ्नं गोविन्दं चित्रकूटके।
अनुत्तमं चोत्तमायां श्वेताद्रौ पद्मलोचनम्॥ 24 ॥

पार्थस्थले परब्रह्म कृष्णाकोट्यां मधुद्विषम्।
नन्दपुर्यां महानन्दं वृद्धपुर्यां वृषाश्रयम्॥ 25 ॥

असङ्गं सङ्गमग्रामे शरण्ये शरणं महत्।
दक्षिणद्वारकायां तु गोपालं जगतां पतिम्॥ 26 ॥

सिंहक्षेत्रे महासिंहं मल्लारिं मणिमण्डपे।
निबिडे निबिडाकारं धानुष्के जगदीश्वरम्॥ 27 ॥

मौहूरे कालमेघं तु मधुरायां तु सुन्दरम्।
वृषभाद्रौ महापुण्ये परमस्वामिसञ्ज्ञकम्॥ 28 ॥

श्रीमद्वरगुणे नाथं कुरुकायां रमासखम्।
गोष्ठीपुरे गोष्ठपतिं शयानं दर्भसंस्तरे॥ 29 ॥

धन्विमङ्गलके शौरिं बलाढ्यं भ्रमरस्थले।
कुरङ्गे तु तथा पूर्णं कृष्णामेकं वटस्थले॥ 30 ॥

अच्युतं क्षुद्रनद्यां तु पद्मनाभमनन्तके।
एतानि विष्णोः स्थानानि पूजितानि महात्मभिः॥ 31 ॥

अधिष्ठितानि देवेश तत्रासीनं च माधवम् ।
यः स्मरेत्सततं भक्त्या चेतसानन्यगामिना ॥ 32 ॥

स विधूयातिसंसारबन्धं याति हरेः पदम् ।
अष्टोत्तरशतं विष्णोः स्थानानि पठता स्वयम् ॥ 33 ॥

अधीताः सकला वेदाः कृताश्च विविधा मखाः ।
सम्पादिता तथा मुक्तिः परमानन्ददायिनी ॥ 34 ॥

अवगाढानि तीर्थानि ज्ञातः स भगवान् हरिः ।
आद्यमेतत्स्वयं व्यक्तं विमानं रङ्गसञ्ज्ञकम् ।
श्रीमुष्णं वेङ्कटाद्रिं च शालग्रामं च नैमिषम् ॥ 35 ॥

तोताद्रिं पुष्करं चैव नरनारायणाश्रमम् ।
अष्टौ मे मूर्तयः सन्ति स्वयं व्यक्ता महीतले ॥ 36 ॥

॥ इति श्रीविष्णोरष्टोत्तरशतदिव्यस्थानीयनामस्तोत्रं सम्पूर्णम् ॥

# श्रीविष्णुः अष्टोत्तरशत दिव्यस्थानीय नामावलिः

ओं श्रीवैकुण्ठे वासुदेवाय नमः ।
ओं आमोदे कर्षणाय नमः ।
ओं प्रमोदे प्रद्युम्नाय नमः ।
ओं सम्मोदे अनिरुद्धाय नमः ।
ओं सत्यलोके विष्णवे नमः ।
ओं सूर्यमण्डले पद्माक्षाय नमः ।
ओं क्षीराब्धौ शेषशयनाय नमः ।
ओं श्वेतद्वीपेतु तारकाय नमः ।
ओं बदर्यां नारायणाय नमः ।
ओं नैमिषे हरये नमः । (10)

ओं हरिक्षेत्रे शालग्रामाय नमः ।
ओं अयोध्यायां रघूत्तमाय नमः ।
ओं मथुरायां बालकृष्णाय नमः ।
ओं मायायां मधुसूदनाय नमः ।
ओं काश्यां भोगशयनाय नमः ।
ओं अमवन्त्यां अवनीपतये नमः ।
ओं द्वारवत्यां यादवेन्द्राय नमः ।
ओं व्रजे गोपीजनप्रियाय नमः ।
ओं वृन्दावने नन्दसूनवे नमः ।
ओं कालियह्रदे गोविन्दाय नमः । (20)

ओं गोवर्धने गोपवेषाय नमः ।
ओं गोमन्तपर्वते शौरये नमः ।
ओं हरिद्वारे जगत्पतये नमः ।
ओं प्रयागे माधवाय नमः ।
ओं गयायां गदाधराय नमः ।
ओं गङ्गासागरगे विष्णवे नमः ।
ओं चित्रकूटे राघवाय नमः ।
ओं नन्दिग्रामे राक्षसघ्नाय नमः ।
ओं प्रभासे विश्वरूपाय नमः ।
ओं श्रीकूर्मे कूर्ममचलाय नमः । (30)

ओं नीलाद्रौ पुरुषोत्तमाय नमः ।
ओं सिंहाचले महासिंहाय नमः ।
ओं तुलसीवने गदिनां नमः ।
ओं घृतशैले पापहराय नमः ।
ओं श्वेताद्रौ सिंहरूपाय नमः ।
ओं धर्मपुर्यां योगानन्दाय नमः ।
ओं काकुले आन्ध्रनायकाय नमः ।
ओं गारुडाद्रौ अहोबिले हिरण्यासुरमर्दनाय नमः ।
ओं पाण्डुरङ्गे विठ्ठलाय नमः ।
ओं वेङ्कटाद्रौ रमासखाय नमः । (40)

ओं यादवाद्रौ नारायणाय नमः ।
ओं घटिकाचले नृसिंहाय नमः ।

ओं काञ्च्यां वारणगिरौ कमललोचनवरदाय नमः ।
ओं काञ्च्यां परमेशपुरे यथोक्तकारिणे नमः ।
ओं काञ्च्यां पाण्डवदूताय नमः ।
ओं काञ्च्यां त्रिविक्रमाय नमः ।
ओं काञ्च्यां कामासिक्यां नृसिंहाय नमः ।
ओं काञ्च्यां कामासिक्यां अष्टभुजाय नमः ।
ओं काञ्च्यां मेघाकाराय नमः ।
ओं काञ्च्यां शुभाकाराय नमः । (50)

ओं काञ्च्यां शेषाकाराय नमः ।
ओं काञ्च्यां शोभनाय नमः ।
ओं काञ्च्यां कामकोट्यां शुभप्रदाय नमः ।
ओं काञ्च्यां कालमेघाय नमः ।
ओं काञ्च्यां खगारूढाय नमः ।
ओं काञ्च्यां कोटिसूर्यसमप्रभाय नमः ।
ओं काञ्च्यां दिव्याय नमः ।
ओं काञ्च्यां दीपप्रकाशाय नमः ।
ओं काञ्च्यां प्रवालवर्णाय नमः ।
ओं काञ्च्यां दीपाभाय नमः । (60)

ओं श्रीगृध्रसरसस्तीरे विजयराघवाय नमः ।
ओं महापुण्ये वीक्षारण्ये वीरराघवाय नमः ।
ओं तोताद्रौ तुङ्गशयनाय नमः ।
ओं गजस्थले गजार्तिघ्नाय नमः ।

ओं बलिपुरे महाबलाय नमः ।
ओं भक्तिसारे जगत्पतये नमः ।
ओं श्रीमुष्णे महावराहाय नमः ।
ओं महीन्द्रे पद्मलोचनाय नमः ।
ओं श्रीरङ्गे जगन्नाथाय नमः ।
ओं श्रीधामे जानकीप्रियाय नमः । (70)

ओं सारक्षेत्रे सारनाथाय नमः ।
ओं खण्डने हरचापहाय नमः ।
ओं श्रीनिवासस्थले पूर्णाय नमः ।
ओं स्वर्णमन्दिरे सुवर्णाय नमः ।
ओं व्याघ्रपुर्यां महाविष्णवे नमः ।
ओं भक्तिस्थाने भक्तिदाय नमः ।
ओं श्वेतह्रदे शान्तमूर्तये नमः ।
ओं अग्निपुर्यां सुरप्रियाय नमः ।
ओं भार्गवस्थाने भर्गाय नमः ।
ओं वैकुण्ठे माधवाय नमः । (80)

ओं पुरुषोत्तमे भक्तसखाय नमः ।
ओं चक्रतीर्थे सुदर्शनाय नमः ।
ओं कुम्भकोणे चक्रपाणये नमः ।
ओं भूतस्थाने शार्ङ्गिणाय नमः ।
ओं कपिस्थले गजार्तिघ्नाय नमः ।
ओं चित्रकूटके गोविन्दाय नमः ।

ओं उत्तमायां अनुत्तमाय नमः ।
ओं श्वेताद्रौ पद्मलोचनाय नमः ।
ओं पार्थस्थले परब्रह्मणे नमः ।
ओं कृष्णाकोट्यां मधुद्विषे नमः । (90)

ओं नन्दपुर्यां महानन्दाय नमः ।
ओं वृद्धपुर्यां वृषाश्रयाय नमः ।
ओं सङ्गमग्रामे असङ्गाय नमः ।
ओं शरण्ये शरणाय नमः ।
ओं दक्षिणद्वारकायां गोपालाय नमः ।
ओं सिंहक्षेत्रे महासिंहाय नमः ।
ओं मणिमण्डपे मल्लारये नमः ।
ओं निबिडे निबिडाकाराय नमः ।
ओं धानुष्के जगदीश्वराय नमः ।
ओं मौहूरे कालमेघाय नमः । (100)

ओं मधुरायां सुन्दराय नमः ।
ओं वृषभाद्रौ परमस्वामिने नमः ।
ओं श्रीमद्वरगुणे नाथाय नमः ।
ओं कुरुकायां रमासखये नमः ।
ओं गोष्ठीपुरे गोष्ठपतये नमः ।
ओं दर्भसंस्तरे शयानाय नमः ।
ओं धन्विमङ्गलके शौरये नमः ।
ओं भ्रमरस्थले बलाढ्याय नमः ।

ओं कुरङ्गे पूर्णाय नमः ।
ओं वटस्थले कृष्णाय नमः ।
ओं क्षुद्रनद्यां अच्युताय नमः ।
ओं अनन्तके पद्मनाभाय नमः । (112)

॥ इति श्रीविष्णोरष्टोत्तरशतदिव्यस्थानीय नामावलिः सम्पूर्णम् ॥

पूर्ण आनन्द लहरि

எண்ணா யிரத்தாண்டு யோகம் இருக்கினும்
கண்ணார் அமுதினைக் கண்டறி வாரில்லை
உண்ணாடிக் குள்ளே ஒளியுற நோக்கினால்
கண்ணாடி போலக் கலந்துநின் றானே
- திருமந்திரம் 603



**Eight thousand years of yogA dear**
**Might not take you to Her near**
**Light you seek within you clear**
**Right like mirror you merge full gear**